मासाविति च व्याख्यातयोः संज्ञाकरणं शास्त्रसंव्यवहारार्थम्। वक्ष्यति। पूर्वा दर्शपूर्णमासाभ्यामन्वारम्भणीयेष्टिरित्येवमादिषु अन-योरुपस्थानं यथा स्यात्[1]। न च कौण्डपायिनामयनीययोर्द्वय-मनयोरेव धर्माम्नानात्। दर्शशब्देनामावास्यमुच्यते। तस्य पूर्व-निपातः समासेऽल्पाच्तरत्वात्। अनुष्ठाने तु पौर्णमासं प्रथमम्। कुत एतत्। यद्यपरपक्षे भक्तं नीयात्तस्य यज्ञविकर्षः स्यादिति[2] ज्ञापकात्। प्रकृतिराद्या प्रकृतिर्मूलं[3] योनिरित्यनर्थान्तरम्। केषां प्रकृतिः। इष्टिपशुबन्धानां इष्टीनां पशुबन्धानां च इष्टिरिति प्रयाजानुयाजाद्यङ्गकलापसहितं यागकर्मोच्यते। पशुबन्धशब्देनापि श्रौतः पशुयागः। अतश्च न शाखापशूनां दर्शपूर्णमासौ प्रकृतिः। अपरे तु वर्णयन्ति। व्याख्यातवचनं शिष्यबुद्धिसमाधानार्थम्। अतश्च याः काश्चिदिष्टयस्तासां प्रथमप्रयोगे दर्शपूर्णमासाङ्गत्वादन्वा-रम्भणीयेज्या भवति। न च पिण्डपितृयज्ञो दर्शस्याङ्गम्। न्याया-न्तरमेतद्व्याख्यातम्।

२. व्याख्यातोऽग्निष्टोमः प्रकृतिर्द्वादशाहस्यैकाहानां (८.१.१) चेत्यग्निष्टोमः स्वधर्मैर्द्वादशाहमन्वेति। व्याख्यातो द्वादशाहः प्रकृतिः सत्राहीनानामिति द्वादशाहः स्वधर्मैरहीनमन्वेति। अग्निष्टोमश्च चोदकपरंपरयान्वेति। तत्राग्निष्टोमस्यापि प्रकृतित्वं यथा स्यादिति सूत्रारम्भः। किं सिद्धमिति चेत्। श्रूयमाणं प्राकृतं नामधेयमन्य-स्मिन्द्रव्ये प्रकृतिं (८. १. २) निवर्तयतीत्याग्निष्टोमिकस्याप्यहीने निवृत्तिः सिद्धा भवति। अचोदाहरणम्। संपातौ तु निविद्धाने

१ A om. यथा। २ कौषीतकि ब्रा० ४.१.। ३ B C कृतिमूलं।

इति (१६. २०. १५.) श्रूयमाणे अनिष्टाउपांश्वियेन्द्रस्य तु वीर्यावी-त्येतयोर्निवृत्तिः सिद्धा भवति। कस्य पुनरन्वयो येनैवमुच्यते। अन्वयस्य प्रकृतिरित्याख्येति। फलस्य नान्वयः। कर्मनिबन्धनत्वात्। तथा यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यस्य नियमस्य विकृतिष्व-नन्वयः। दर्शपूर्णमासकर्मनिबन्धनत्वात्। यत्र दर्शपूर्णमासौ तत्रायं नियमो न च विकृतिषु दर्शपूर्णमासौ। किं तर्हि तद्धर्मता। तथा च जैमिनिः। कर्मणस्तु प्रकृतित्वात्फलनियमकर्तृसमुदायस्यानन्वय-स्तद्बन्धनत्वादिति।

३. येयं प्रकृतिरुक्ता दर्शपूर्णमासाख्या। अस्यामेव तावच्चिन्त्यते। किं प्रधानं कानि चाङ्गानीति। किमेतया चिन्तया प्रयोजनम्। प्रधानविनाशे आवृत्तिः। अङ्गविनाशे चानावृत्तिः। प्रकृतौ चैत-च्चिन्त्यमानं विकृत्यर्थमपि भवतीत्ययमवसरः। अन्तरेणाज्यभागौ स्विष्टकृतं च यदिज्यते तत्प्रधानमिति संबन्धः। यत्रायं प्रदेशः स्विष्टकृदाज्यभागयोरन्तरावर्ती तमावाप इत्याचक्षते। जैमिनिप्रभृतयः सूत्रकाराः। अनया संज्ञया व्यवहरन्ति। अस्य तु प्रयोजनं। अनिर्दिष्टस्थानमस्मिन् देशे[1] प्रोप्यत इति। तेन संज्ञानमिति च जपेरन् (३. ६. ३)। अग्ने वायो विद्युदित्येवमादि (४. ८. ४) प्रधानानन्तरं प्राक् स्विष्टकृतो भवति।

४. यानि सामिधेन्यनुवचनादीनि आज्यभागान्तानि यानि च स्विष्टकृत्प्रभृतीनि परतस्तानि[2] तदङ्गानि। तदिति सर्वनाम्ना

---

१ B प्रदेशे। २ A om. तानि।

आवापिकं[1] प्रधानं निर्दिश्यते। तस्य इतराण्यङ्गानि। उक्तमङ्गचिन्ताप्रयोजनम्।

५. तेषामङ्गानामभिन्नकाले प्रधानप्रयोजने विभवः शक्तिरस्ति। शक्नुवन्ति हि सकृत्कृतान्युपकर्तुमित्यर्थः। तद्यथा। पौर्णमासे प्रधानबहुत्वे ऽपि कालाभेदात्सकृदङ्गानि। तुरायणे च कालभेदात्पृथक्।

६. यत्सकृत्कृतं[2] बहूनामुपकरोति तत्तन्त्रमित्युच्यते। अतश्च लक्षणसूत्रमेतत्। तेन दीक्षणीयादि सकृदपवर्गणे।

७. यत्र तद्धितेन वा चतुर्थ्या वा मन्त्रवर्णेन वा देवताभिः संयुक्तः शब्दः श्रूयते। किंविशिष्टाभिर्देवताभिः। उच्चावचाभिर्बह्वीभिरल्पाभिर्वा। तत्र सर्वत्र प्रदानं[3] प्रत्येतव्यम्। प्रदानं याग इष्टिरित्येको ऽर्थः। प्रधानप्रक्षेपस्य[4] चेयं संज्ञा। प्रदानमावर्तते। तस्य प्रदानं स्विष्टकृदिडं चेति (१५.२.१७) शास्त्रसंव्यवहारार्थम्। ननु उच्चावचाभिरिति न वक्तव्यम्। पक्षान्तरस्यासंभवात्। उच्यते। प्रदानाभिप्रायमेतत्। तद्यथा। मित्रविन्दायां बह्वीनामेकं प्रदानम्। पशुदेवतायास्त्वेकस्या एव प्रदानद्वयं[5] च। तस्मात्प्रदानविशेषणमुच्चावचाभिरिति। ननु पशुविशसनः पशुपशुर्विशाखयूप इति देवतासंयोगाभावात् प्रदानं न प्राप्नोति। उच्यते। समाप्ते श्येनीपृषतीभ्यामिति समाप्तिवचनाद्भविष्यति। विशाखयूपे च यूपवचनात्। यथा लोके किशोरेण सह वडवेत्युक्ते धेनुर्वडवेत्यनुक्तमपि ज्ञायते श्रूयत इति

---

१ A आवापादिकम् C (sec. h.) आग्नेयादिकम्। २ C ins. च। ३ B (orig.) प्रधा०। ४ B ०क्षेपणस्य C ०क्षेपस्य, ण over the line. ५ B वयं instead of द्वयं।

वचनाच्छाखान्तरश्रुतस्यापि देवतासंयोगस्य परिग्रहः पशुविकस्य च देवतासंयोगः शतपथश्रुतौ[1] । मरुत्विग्भ्यो निर्वपतीति न प्रदानमृत्विगुद्देशेन[2] विहितत्वात् । कुतः । शतपथे तमेते चत्वार ऋत्विजः प्राश्नन्तीति प्राशनवचनात् । तथा तेभ्यो ऽध्वर्युश्चातुष्प्राश्यं मह्नौदनं निर्वपतीति च ।

८. तत्र तस्मिन्प्रदानस्य नानारूपे श्रवणे यो विकारो भवति स उच्यते । याया देवता विकृतौ चोदिता तद्देवते याज्यापुरोनुवाक्ये एव भवतो नान्ये । एकमपि वैकृतं प्रधानं बहूनां प्राकृतानां निवृत्तिं करोति । प्रधानत्वसामान्यात् ।

९. इदं चान्यत् । निगमस्थानेषु वक्ष्यमाणेषु देवतादेशनव्यूहनादिषु[3] च सा देवता या यत्र चोदिता । न पर्यायेणात्मैकत्वरूपेण वा नैरुक्तवत् । अतश्च येनैवाभिधानेन चोदिता तेनैवोपलक्ष्यते । प्रकाश्यत इत्यर्थः ।

१०. निगमस्थानशब्दव्युत्पत्तिरादरार्था । स चादरः प्रायश्चित्तविशेषार्थः । ततश्चावाहनादीनामन्यथाकरणेन मन्त्रानुजपमात्रं प्रायश्चित्तम् । अपि च । यस्मादिज्यमाना एव निगच्छन्ति तस्मान्निगमस्थानानीतिवचनात्स्विष्टकृद्यागाभावे अग्निं होत्रायावहत्येतत्पदं न भवति । कुतः संदेहः । होतृत्वकार्ययोगादग्नेर्होतुः । आवाहनादीनि वर्जयित्वान्यत्रानिज्यमानस्यापि शब्दोच्चारणमस्त्येव । तद्यथा । अग्निर्होता वेत्वग्निर्होत्रमित्यादौ । वनस्पतिप्रैषे च । यत्राग्नेर्होतुः प्रिया धामानि । सूक्तवाकप्रैषे च । अग्निमद्य होतारम-

---

१ B ०पथे श्रुतः । २ A ॰उपदेशेन B ०त्विग्नुद्देशेन । ३ A B देशेन ।

हवीतेति। उत्तमे प्रयाज इत्यत्र उत्तमशब्दो यदि न क्रियेत ततः प्रयाज इज्यमाना निगच्छन्तीति त्वष्टृवनस्पत्योः प्रयाजेष्विज्यादर्शनात् तयोरेव निगमनानि स्युः। स्विष्टकृन्निगद इति निगदवचनं संज्ञार्थम्। देवतावचनं चोदितदेवतार्थम्। ततो आज्यावाहितस्येज्यमानस्यापि न निगमाः। ननु पर्यग्निकृतस्य त्वाष्ट्रस्येज्यमानाभावान्निगमाभावः प्राप्नोति। तथा तत्रैव वनस्पतेः स्विष्टकृदिलं भवेत्। उच्यते। पर्यग्निकृतमुत्सृजन्ति (८.२७.५) इति सिद्धे न संज्ञापयन्तीति वचनं सर्वधर्मप्रापणार्थम्। ततो भवत्येवावाहनम्। तथा[1] देवतादेशनादिष्वपि निगमस्थानसंज्ञा। चेत्वारम्भात्। अत उपांशुहविःषु तेषामप्युपांशुता भवति। न च त्वाष्ट्रे दृष्टत्वादन्येषां कपिञ्जलादीनां पर्यग्निकृतानां त्वाष्ट्रधर्माः अनुक्रामन्तश्च विकारान्व्याख्यास्याम इत्युत्तरसूत्रे यत्नात्।

११. ग्रन्थमनुसरन्तो विकारानुक्रमेभ्यो विकारेभ्यो ये अन्यथा भवन्ति तान्व्याख्यास्यामः। असंमोहेन प्रदर्शयिष्यामः। ये चोक्तास्ते च सन्ति याज्यानुक्रमिष्याम इति चशब्दः। तद्देवते याज्यापुरोनुवाक्ये इत्युक्तम्। अनुक्रामन्तो ऽन्यथा वदिष्यामः। तद्यथा। इन्द्र याहि हरिभिः सखे विष्णो वितरं वि क्रमस्वेत्यत्र न विकल्पः। इज्यमाना देवता निगच्छन्तीत्युक्तम्। तदन्यथाप्यनुक्रामन्तो वर्णयिष्यामः। यथा। इन्द्रं वसुमन्तमावहेत्यादौ। अभिरूपेषु पर्यायेणापि देवतानामेतत्येवमादिश्रुतेर्वचनादन्यथा वक्ष्यामः।

१२. वक्ष्यति। अग्नये पवमानायेष्टिः पौर्णमासीविकारः। तत्र

---

१ A B तेषाम्।

वार्त्रघ्नावाज्यभागौ प्रतीयात्प्रणीयादित्यर्थः[१]। सामिधेनीस्विष्टकृत्प्रतिषेधार्था इयं परिभाषा। अन्यथा चोदितेन सह विकल्पः स्यात्। ननु वार्त्रघ्नौ वृधन्वन्ताविति सर्वत्र वक्तव्यं किं पौर्णमासीविकारो ऽमावास्याविकार इति वचनेन। उभयसंज्ञार्थम्। किं कृतं भवति। पौर्णमासं प्रथमायै तन्त्रं भवतीत्यस्याप्ययमेवार्थ इति ज्ञापितं भवति।

१३. प्रतीयादिति वाक्यशेषः।

१४. पौर्णमासीविकार इत्युक्ते वार्त्रघ्नौ। अमावास्याविकारे वृधन्वन्तौ इति वचनात्[२] अनुक्ते न किंचित्प्राप्नोतीति तदर्थं वचनम्। विकल्पभूतौ विकल्पेन भवत इत्यर्थः।

१५. देवतया हेतुभूतया प्रतीयात्। कथम्। यत्राग्निर्देवतात्वेन श्रूयते ऽग्नीषोमौ वा तत्र वार्त्रघ्नौ। यत्रेन्द्र इन्द्राग्नी वा तत्र वृधन्वन्तौ।

१६. इयमपि हेतावेव पञ्चमी। हविषा वा हेतुभूतेन हविषा वा लिङ्गेन प्रतीयात्। कथम्। औषधद्रव्यं पौर्णमासे[३]। सांनाय्यद्रव्यममावास्यायाम्।

१७. प्रतीयादिति वर्तते। यत्र हेतुसंनिपातः। तद्यथा। ऐन्द्रमेकादशकपालं पुरोडाशं निर्वपेदाग्नेयं पय इति। तत्र हविषो बलीयस्त्वम्। तत्र ऐन्द्रे पुरोडाशे वार्त्रघ्नौ। आग्नेये पयसि वृधन्वन्तौ।

१८. सर्वार्था इयं परिभाषा। आज्यभागार्थायास्तु विकल्पस्यानवकाशः स्यात्। अत्रोदाहरणानि। विराजौ (३.१३.२३)

१ C ins: - - वाक्यं। तेषां देवताशब्दादिष्वपि निगमव्याख्यातसंज्ञा। २ B वित्र-माद् instead of वचनाद्। ३ B पौर्णमासं resp. आमावास्यम्।

स्विष्टकृत इत्युक्तेऋक्सामान्यादृगेव[1] नियम्यते। न निगदः। अतो निगदानिवृत्तिः। कयाशुभीयेन अनिष्टाउपीयस्य निवृत्तिः। सूक्तेन सूक्तस्यैव सामान्यात्। बहुदेवतस्य प्रकृत्यभिमन्नमने[2] तत्र ऐन्द्राग्नं याज्यानुवाक्यायुगलम्। इन्द्राग्नी वै सर्वे देवा इत्यर्थवादसामान्यात्। अन्याय इति चेत्। उच्यते। असत्यां गतौ येन केनचित्सामान्येन व्यवस्था युक्ता।

१९. तदन्यत्र साधनाभ्यां दर्शपूर्णमासाभ्यामित्यत्र (१.४.१२) वस्तुकर्मणोक्तं न शब्दतः। तदिहानूद्यत एवाभंदेशार्थम्। उत्तरसूत्रार्थं च। चशब्द इष्टिपशुबन्धाधिकारानुकर्षणार्थः।

२०. अविकल्पार्थं सूत्रम्। इष्टिपशुबन्धेष्वेव वचनादन्यत्[3]। सोमे तु सत्यपि वचने दीक्षणीयादिषु विकल्पो भवति। तथा च शतपथे। तस्य सप्तदश सामिधेन्यो भवन्ति। उपसत्सु तु यावदादिष्टं कुर्यादिति यत्रास्य विकल्पः। नासाधर्मातिदेश इति न्यायाच्चातुर्मास्यसोमेषु। पित्र्यायामेकैव सामिधेनी। अतश्च मित्रविन्दायां पञ्चदशैव सामिधेन्यः। शाखान्तरे तु सप्तदश सामिधेनीसमाम्नातम्। तेन सह विकल्पो न भवति। ननु विश्वजिति[4] केषांचिदेकविंशतिः सामिधेन्यः शाखान्तरे। तथा इष्टकापशौ शतपथे। तस्यैकविंशतिः सामिधेन्यस्तेषां चतुर्विंशतिः सामिधेन्य इति तत्र कथम्। उच्यते। अस्माकं तत्र विशेषाभावात्साप्तदश्येन सह विकल्पः।

१ A °त्युक्ते ऋक्सा° B °त्युक्ते ऋत्वसा°। २ A प्रकृता° C प्रकृतासंनमनमैन्द्राग्नं या°। ३ A C (in marg.) ins. इष्टिपशुबन्धेष्विति वचनात्। ४ A ins. विषुवति।

२१. काम्यासु कामसंबन्धेन चोदितासु। तद्यथा। सार्वकामिकाग्नये कामाय इत्येवमाद्यासु स्त्रीलिङ्गनिर्दिष्टासु उपांशुहविष्टं कार्यम्। यच्चाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या इति श्रुतेः। लिङ्गदर्शनाच्च। अथो सर्वे वै कामा विभक्तिषु तस्मादुपांशु भवन्तीति स्वश्रुतौ (२.५)।

२२. अकाम्यास्वपि दीक्षणीयाद्यासु तथा अनिर्दिष्टेष्वपि च तद्यथा सौर्यस्योपांशु प्राजापत्यस्योपांशु इत्यादिषु। यन्यमनुसरन्तो व्याख्यास्यामः। अविकल्पार्थो ऽयं योगः। देवत उच्चैरुपांशुतायां (१३.१.३) चेत्युक्ते ऽपि स्वमतपरिग्रहार्थं वचनम्।

१७.

१. हविषां विधानप्रक्रमे[1] प्रतीकग्रहणमृगादिग्रहणं याज्यापुरोनुवाक्यानां प्रत्येतव्यम्। एतामामृचां प्रतीकानि विभक्तय इति श्रुतौ प्रयोगदर्शनात्। एतदुक्तं भवति। यागचोदनाप्रक्रमे[2] यत्प्रतीकग्रहणं तद्याज्यापुरोनुवाक्यानां प्रतीयात्। यद्यन्यः प्रयोजनान्तरसंबन्धो नास्ति। अत्रोदाहरणानि। सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति यजतीति प्रकृत्याह। आ प्यायस्व सं ते पयांसीह त्वष्टारं तं नस्तुरीपमित्यादि। तथाग्नये ऽग्निमत इति प्रकृत्या[3]ग्निमग्निं हवीमभिरित्यादि। तथा प्रायणीयेष्टिः। पथ्यां स्वस्तिमग्निं सोममित्याद्यनुक्रम्य स्वस्ति नः पथ्यासु स्वस्तिरिद्धग्ने नयाग्ने

---

१ A ०प्रधान० B ०विप्रदान०। २ A ०प्रकरणं B याज्याचो०। ३ B ins. चाह।

त्वं पारयेत्यादि। न चेदन्यो ऽर्थसंयोग इति कस्मात्। उच्यते। आग्नेयौ वा द्वयोः पूर्वार्ध्येन तनूदेवताः पुरस्तात्पुरोळाशस्याग्निं पवमानं पावकं च शुचिं चोपरिष्टाद्विश्वेभिरग्ने अग्निभिरग्ने विश्वेभिरग्निभिरिति (२.३.८.१०) स्विष्टकृदर्थेन संयोगात्प्रधान-त्वेते न भवतः। अग्ने जुषस्वेत्याहुतौ हूयमानायाम्। उपप्रियमित्याश्व-वनीये हूयमानायामिति नैते याज्ये। अग्नीषोमप्रणयनसंयोगात्।

२. द्विप्रभृतिषु [1]यजतिषु देवतालिङ्गरहितेष्वपि चोदनानुपूर्व्येण याज्यापुरोनुवाक्ये भवतः। तद्यथा। दूतं वो विश्ववेदसमिति द्विदेवत्यानामिति (१४. ५१. १४) चोदनाग्रहणे असति यागा-नुपूर्व्येण स्यात्। को दोष इति चेत्। उच्यते। पशुपुरोळाशे ऽक्रियमाणे ये एव पशुपुरोळाशस्य प्राप्ते ते एव प्राप्नुतः पशोः। तन्मा भूदिति चोदनाग्रहणम्।

३. न केवलं चोदनानुपूर्व्येण व्यवस्था किं तर्हि दैवतेन प्राधा-न्यस्तुतिभाजा शब्देन। चोदितदेवतापर्यायेणेत्यर्थः।

४. लिङ्गमुच्यते। लिङ्गमात्मन्यनुच्चरितं[2] यदुच्चार्यमाणं लिङ्गिनं प्रत्याययति। यथा। धूमकेतुः पुरुश्चन्द्र इत्यग्नेः। तेन लिङ्गेन। न केवलं पूर्वैरेव कारणैर्व्यवस्था।

५. उपसर्जनमुपसर्गो गुण इत्यर्थः। अतश्च सगुणासु देवतासु चोदितास्वनधिगच्छन् अप्राप्नुवन् तल्लिङ्गे सगुणे देवतालिङ्गे दैवतेन देवताशब्देन केवलेन तुष्येत्। आत्मनस्तुष्टिं कुर्यात्। नचे तु

---

१ A om. यजतिषु। २ A लिङ्गिनमात्म° B लिङ्गिनंत्मन° C लिङ्गिमात्मनं।

न कुर्यात्। यत्र सूत्रकारेण याज्यापुरोनुवाक्ये नोक्ते तत्रैवं कुर्यात्। तद्यथा। विश्वेभ्यो देवेभ्यो वार्षिकेभ्यो आगतेभ्यः सप्तदशेभ्यो वेकपेभ्य इत्यादौ।

६. उपसृष्टाः सगुणा एव निगमस्थानेषु भवन्ति। तद्यथा। अग्निं तपस्वन्तं जनद्वन्तं पावकवन्तमावहेति।

७. अभीक्ष्णं पुनःपुनर्या काचिद्देवता तस्यैतस्यै देवतायै हविश्चोद्यते। एकस्मिन्नेव कर्मणि। तद्यथा। आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुम्। आग्नेयं कृष्णग्रीवमिति चरकाणाम्। तत्र प्रथमस्याग्नेयस्याग्ने नयेति षट्कः। द्वितीयस्या ते वत्सो मनो यमदित्यग्नये कामाय षट्क उक्तः। ननु सगुणा एताः। उच्यते। निर्गुणस्य चोदितस्य गुणो भवन्नपि न दुष्यति। यथा प्र तत्ते अद्य शिपिविष्टेति। देवतायै हविश्चोद्यत इति देवतावचनात्काये प्राजापत्याः प्राजापत्य इतरे। को वै प्रजापतिरित्यर्थवादात्। तथा प्रजापतिर्वै क इति च। हविश्चोद्यते तत्रेति वचनाद्यस्मिन्नेव हविषि पूर्वमुपदेशः औषधमाज्यं वा तत्र व्यवस्था। प्रथमोपदिष्टे प्रथमचोदनायामुपदिष्टे इत्यर्थः। याज्यानुवाक्ये इति। ननु याज्यैव केवला। यातयामत्वदोषाशङ्कया ते इति वचनाद्विपर्यासेनापि ते एव। वर्धयिमौ (१. १७. ११) तु याज्येति तत्र तुशब्दान्नियमः। सर्वत्र प्रतीयात्। सर्वत्रैव जानीयात्।

८. इदं चान्यदुच्यते। इष्टयो बहुप्रकाराः शाखान्तरेषु कामविशेषसंयुक्ताः पठ्यन्ते। ताश्च पृथक्त्वतः नानात्वेन न शक्या विगणयितुं ततस्तास्वपि धर्मान्यथोक्ताननुतिष्ठेत्। तद्यथा। स यदि

वृष्टिकामः स्यात्तदीष्ट्या वा यजेत दर्शपूर्णमासयोर्वैवं ब्रूयाद्वृष्टिकामो वा अस्मीति तत्रोक्ता अध्वर्युं ब्रूयात्पुरोवातं च विद्युतं च मनसाध्यायेति अभ्राणि मनसाध्यायेत्याग्नीध्रं स्तनयित्नुं च वर्षं च मनसाध्यायेति होतारं सर्वाण्येतानि मनसाध्यायेति ब्रह्माणमित्येवमादयो धर्माः शाखान्तरीया ग्राह्या इत्येवमर्थः सूत्रारम्भः।

९. तत्र तेष्वपि शाखान्तरेषु या अनादिष्टयाज्यापुरोनुवाक्या देवताः तासु गायत्रीत्रिष्टुभौ। गायत्री पुरोनुवाक्या त्रिष्टुब्याज्या इत्येतया व्यवस्थया। तद्दैवते या देवता चोदिता। न तु भक्तिमात्रेण। यथा। आग्नेयी गायत्रीति। परीक्षेत्। सर्वतोऽन्विच्छेत्।

१०. गायत्रीत्रिष्टुभोरलाभे उष्णिहं बृहतीं च परिहाप्य अन्यानि प्राकृतानि विराडष्टमानि छन्दांसि ग्रहीतव्यानि। कुतः[१]। विराडष्टमानि ह वा एतं छन्दांसि गोपायन्ति योऽसौ तपति तां ते संपदं मोहयन्ति ये ऽतिच्छन्दोभिर्यजन्तीत्यपरेण दर्शनात्। नोष्णिहा वषट्कुर्यान्न बृहत्या वषट्कुर्यादिति चरकाणाम्[२]। अभावे ऽन्यथापि शुनासीराविमामिति यत्नात्।

११. पुरोनुवाक्यातो याज्या वर्षीयसी गुरुतरा कर्तव्या। तुशब्दो नियमार्थः। तेन यत्र विपर्यासेन लघीयसी तत्र न विपर्यस्येत् यद्यपि अभीक्ष्णचोदना[३] ये ते इति परियत्नात्। तथा च मस्त्विनो याज्यापुरोनुवाक्याविपर्यासे[४] सूत्रकारेणैव कृतो यत्नः

१ B om. the words from अलाभे to कुतः C orig. from विराड॰ to कुतः। २ B कुर्यादिति च कारणम्। C कुर्यादिति च। विराडष्टमानि छन्दांसि ग्रहीतव्यानि। कुतः कारणम्। ३ B अभीक्ष्णचोदनायां यो न इति परियत्नात् C अभीक्ष्णदेवतासु। ४ C om. याज्यापुरोनुवाक्या।

उत्तरस्य महिम्नो याज्यापुरोनुवाक्ये विपर्यस्येदिति (१६.७.१२)। विच्छन्दसो न विपर्यासो भवति। त्रिष्टुप्जगत्योश्च त्रिष्टुप् वर्षीयसी। शौनकवचनात् गुर्वक्षराणां गुरुत्वक्ति सर्वं गुर्वक्षरं त्रैष्टुभमेव विद्यादिति (३.१८.३३)।

१२. पूर्वोक्ताभावे सति समे वा। तुल्यप्रमाणे कल्पयितव्ये।

१३. यत्र ययोर्याज्यापुरोनुवाक्ययोरेतेषां वक्ष्यमाणानां लक्षणानां किंचिद्भवेत्। पुरोनुवाक्यालक्षणान्यप्यसंभवे याज्यायां ग्राह्याणि। याज्यालक्षणान्यपि पुरोनुवाक्यायाम्। कथं नाम स्युरित्येवमर्थः सूत्रारम्भः। किंचित्स्यादिति वचनात् हुवे ह्वयामि आहुवामहे पिब पाहि अपाः एवमादि। न तु यथापठितान्येव ग्राह्याणि।

१४. हुवे हवामहे अध्यागह्येदं बर्हिर्निषीद देवतानामेति पुरोनुवाक्यालक्षणानि। हुवे हवामहे एते एव कर्तृवचने। नान्ये लक्षणत्वेन ग्रहीतव्ये ददामि ब्रवीमीति। कुतः। किंचिद्वचनाल्लिङ्गे तुल्यार्थयोः पाठात्। आगहीति सोपसर्गमतः पुनःपाठः। निषीदेति सोपसर्गमेकं लक्षणम्। देवतानामेति। नामधेयमिति नोक्तं पर्यायान्तरस्यापि ग्रहणार्थम्। न चेष्टय इतीष्ट्यधिकारेऽपि सति लक्षणानीति वचनात्याग्रुकान्यप्येतानि लक्षणानि।

१५. अद्धि पिबेत्येतेषां न स्वरूपेण ग्रहणम्। किं तर्हि उपलक्षणमात्रेण। कुतः। लक्षणाधिकारे पुनर्लक्षणानीति वचनात्। अतश्च कश्चिद्धातुव्यत्ययो भवति। न चैतदलाक्षणिकं नैगमेषु तत्रतत्र ग्रहणात्। तथा च श्रुतिः। आऊतीदृधमित्यभिह्या (८.८)। जुषस्व

प्रतिहर्यतेत्यभिरूपा। देव याज्येत्यभिरूपा। हविष्मती हविषः। वंहिष्ठमिति बहुल इव हि पुरोलाशः। प्र वाहवा सिसृतं जीवसे न (कौ० ब्रा० १८.१३) इति हविषो बाहवेति तद्धविषो ऽङ्गानां रूपं इत्येवमादीन्याह। किमेवं सिद्धमिति चेत्। उच्यते। गायत्रः सर्वस्वार इति प्राकृतानां स्थाने तल्लिङ्गयुक्ता गायत्र्यः कर्तव्याः। तत्र केनचित्सामान्येन लिङ्गं सिद्धं भवति।

१६. पूर्वस्मिन् प्रदेशे लक्षणं यस्याः स्यात् सा पुरोनुवाक्या समृद्धलक्षणा।

१७. उपरि लक्षणं यस्याः सा उपरिष्टाल्लक्षणा। द्वितीये ऽर्धर्चे [1]वा पादे लक्षणं यस्याः सा याज्या समृद्धा। प्रदेशविशेषस्योक्तस्याभावे अनियम इति[2] पृथक्सूत्रारम्भात्।

१८. अनधिगच्छन्नलभमानस्तद्देवते। तदिति सर्वनाम्ना चोदितायाः परामर्शः। सा देवता अनयोरिति अतद्गुणसंविज्ञानो[3] बहुव्रीहिः। तेनैतत्सिद्धं भवति। ऋगन्तरस्थेनापि देवतापदेनोपलक्षिते याज्ये। यथाभितष्टीयभूतांशादिषु। अधिगमानधिगमौ च बह्वृचशाखाविषयौ। तथा दैवते दर्शनात्। तत्र द्वाशतयीप्रधानैव देवताचिन्ता[4]। यतः सवाभ्यां यजेत्। सवाभ्यां समनशीलाभ्यां पुनःपुनःप्रयोगे ऽप्ययातयामाभ्यामित्यर्थः। यजेदिति वचनादिष्टिपशुसोमेषु सर्वत्र।

१९. इतिशब्द एवशब्दस्यार्थे। ऊहेदेव। न विकल्पं कुर्यात्।

---

१ C ins. ऽन्ये। २ A om. इति। ३ B om. वि A ०ग्रयं। ४ A चिन्त्यतः B चिन्त्येत।

यच्च विकारो न विद्यत इत्यनेन ऊहेद्यथार्थं प्रापयेदित्यर्थः। द्विदेवतबहुदेवतेषु हविःषु। अनयोर्ऋचोर्गुणिपदस्याभावात्कदाचिदाह्वनीयो हविर्वहनार्थमभ्यर्थ्यत इति संदेहः स्यात्तदर्थं द्विदेवतबहुदेवतेष्विति वचनं। अहेळता मनसेत्यनयोर्वा अनूहार्थम्। मनसा देवानां वाचा पार्थिवानामिति लोकप्रसिद्धेः॥ आवृणुतं आवृणुत॥ वां गीर्भिः। वो गीर्भिः॥ निषीदतं नः। निषीदत नः॥ गच्छतं। गच्छत॥ जुषेथां। जुषध्वं॥ वीतं। वीत॥

२०. इदं चानादिष्टयाज्यापुरोनुवाक्यासु पश्चान्तरम्। प्राकृतीर्याज्यापुरोनुवाक्याः स्वधर्मेणानुब्रुवन् होता तां विकृतिचोदितां देवतां प्रणमेत्। कथम् आत्मनोऽभिमुखीकृत्य हृदि विज्ञानमयीं प्रकृतिमभिलिख्य नानात्वविवेकैकत्वैः[1] संकल्प्य मनसा ध्यायेत्। तथा च श्रुतिः। यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति। द्विरभ्यासो ऽध्यायपरिसमाप्तौ शिष्टाचारस्तदाचरणं चायुष्यमिति॥

इति शाङ्खायनसूत्रपूर्वार्धभाष्ये प्रथमो ऽध्यायः।

---

१ C ऊमेक॰ ; in marg द्वि।

अथ द्वितीयो ऽध्यायः।

१.

१. उक्तमेतद्व्याख्यातौ दर्शपूर्णमासौ प्रकृतिरिष्टिपशुबन्धानामिति न च दर्शपूर्णमासादिकाः क्रिया गार्हपत्याहवनीयाग्न्याद्यर्थपवनादिभ्यो विनापि सिध्यन्ति । आधानादिगुणविशिष्टाश्च गार्हपत्याद्याख्यां लभन्ते। नान्येनोपायेनाकृताः। तदर्थमुच्यते। वसन्ते ब्राह्मणस्याग्न्याधेयमिति। वसन्त ऋतुस्तस्मिन् ऋतौ ब्राह्मणस्य यजमानस्याग्न्याधेयाख्यं कर्म भवति। कुत एतत्। ब्राह्मणो वसन्त आदधीतेति श्रुत्यन्तरात्। स्वशाखायामप्यग्न्युत्पत्तिशेषत्वेन तनूदेवताश्च दृष्टय उक्ताः। अस्मिन्वै लोके उभये देवमनुष्या आसुरित्युपक्रम्य एता वा अग्नेस्तन्वस्तद्देता देवता यजत्यचाग्निः साङ्गः सतनूः प्रीतो भवतीति।

२. समानं पूर्वेण।

३. कृतव्याख्यानम्।

४. वैश्यस्यायं विकल्पो ऽनन्तरत्वात्।

५. शिशिर ऋतुः सर्ववर्णानां वसन्तादिभिर्विकल्पत इति वाक्यशेषः। एवमेव शाखान्तरे श्रुतत्वात्।

६. वसन्तादिष्वपि अनियमः सोमेन यक्ष्यमाणस्य। तथा च श्रुतिः। सोमेन यक्ष्यमाण आदधानो नर्तुं पृच्छेत न नक्षत्रम्।

७. उक्तेषु ऋतुष्वेवानयोस्तिथ्योराधानं कुर्यात्। तत्रामावास्या-

धाने पूर्वस्यामुपवासाद्युपक्रम उत्तरस्यामन्युत्पत्तिरिष्टयश्च। कुतः। शतपथश्रुतेः। पौर्णमास्याधाने तु चतुर्दश्यामुपवासाद्युपक्रमः पौर्णमास्यामन्युत्पत्तिरिष्टयश्च। श्वोभूते ऽन्वारम्भणीया पौर्णमासं च। कुतः। काठके दर्शनात्। तत्र पठ्यते। आधानं चेत्पौर्णमास्यां पूर्वां तनूदेवताभ्य उपवसेदुत्तरामन्वारम्भणीयायै पर्वणे चेति।

८. उक्तेष्वेवर्तुषु पूर्वेण सह विकल्पार्थो वाशब्दः। शुद्धपक्षे शुक्लपक्षे पुण्ये नक्षत्रे पुष्यादौ आदधीत।

९. काममसंयुक्तानि यथाश्रुतानि ब्राह्मणानीति शेषः। तद्यथा। बहुर्हैव प्रजया पशुभिर्भवति य एवंविद्वान्रोहिण्यामाधत्ते। श्रियं ह गच्छति य एवंविद्वान्मृगशीर्ष आधत्ते। पूर्वयोरादधीत पुरस्तात्तुर्हैवास्मै भवति। उत्तरयोरादधीत श्वःश्रेयसं हैवास्मा उत्तरावद्भवति। हस्ते अग्नी आदधीत य इच्छेत्प्र मे दीयेतेति। चकारो विकल्पानुकर्षणार्थः।

२.

१. उच्यन्त इति वाक्यशेषः। किमर्थमेतत्। उच्यते। पूर्वकालैः सह समुच्चयो मा विज्ञायीति। अथशब्दस्तर्हि अनर्थको ऽनन्तरमेव कालवचनात्। सत्यम्। इष्टिकाला इत्यस्य पूर्वपदेन सहानन्तर्यार्थेनार्थवान् भवति[1]। तथाहिताग्नित्वे सत्यपि इष्टिकरणपक्षे ऽङ्गीकृते यावदिष्टयो न कृतास्तावदन्याः क्रिया यागहोमरूपा

---

1 C om. सह।

न भवन्ति। अदितिं वा अन्वग्न्याधेयं संतिष्ठत इति (१४. २. २१) लिङ्गात्।

२. वाशब्दः प्रत्येकमभिसंबध्यते। सद्यस्तस्मिन्नेवाहनि। द्वादशाहे द्वादशाहान्ते। सप्तमीनिर्देशात्। एवं मासादयो द्रष्टव्याः। कुतः। शाखान्तरश्रवणात्।

३. एतास्ता इष्टय उच्यन्ते यासां काला उक्ताः। अग्नये पवमानगुणायेष्टिः कर्तव्या। एवमेव श्रुतत्वात्।

४. वार्त्रघ्नावाज्यभागावित्यर्थः। सिद्धमेवैतत्। पुरोलाशस्विष्टादाग्नेयत्वाच्च। तथाप्युच्यते। अस्या एव द्वितीयत्वे वृधन्वन्तौ मा भूताम्। आमावास्यं द्वितीयाया इति श्रुतेः।

५. अग्न आयूंषि पवस इति पुरोनुवाक्या। अग्ने पवस्व स्वपा याज्या।

६. तं हि शश्वन्त ईलते अनुवाक्या। ते स्याम ये अग्नये याज्या। एते स्विष्टकृतौ। ईलितवत्यौ हव्यवाड्वत्यौ प्रथमायै संयाज्ये इति श्रुतेः। श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं निवर्तयतीति प्राकृतयोर्निवृत्तिः। निगदस्य चानिवृत्तिः। अतुल्यत्वात्। गृहमेधीयायां च निगदप्रतिषेधात्।

७. अग्नये पावकगुणायैकं हविः। अग्नये शुचिगुणाय द्वितीयम्। एषा द्वितीया इष्टिः स्त्रीलिङ्गनिर्देशात्। पावकशुची गुणौ। द्वौ स्वग्नी यजतीति श्रुतेः। अग्नये च पावकाय शुचये चेति नोक्तम्। [1]शुचेरेवाग्निरहितस्य यागो मा विज्ञायीति। एता

१ A B C शुचिरे॰।

वा अग्निस्तद्वत्सहदेता देवता यजतीति संदेहः स्यात्। अन्यथा सह समाम्नातस्योपदेशे एतदीयं तन्त्रं द्विस्याम्नानात्।

८. वृधन्वन्तावाज्यभागौ।

९. अग्ने पावक रोचिषा पुरोनुवाक्या। स नः पावक दीदिवो याज्या प्रथमस्य हविषः।

१०. अग्निः शुचिव्रततम इति पुरोनुवाक्या। उदग्ने शुचय-स्तव याज्या द्वितीयस्य हविषः। ता वै गायत्र्यो भवन्ति। अभि-रूपा भवन्तीति लिङ्गात्।

११. अग्निमग्निं हवीमभिः पुरोनुवाक्या। अग्निनाग्निः समि-ध्यते याज्या। शुग्नौ द्वितीयाया इति श्रुतेः।

१२. इष्टिग्रहणमनुवर्तते। अदितये तृतीया इष्टिर्भवति। द्वितीयातृतीयाग्रहणमिष्टित्रयेणाप्यमेक आधानकल्प इत्यस्यार्थस्य प्रतिपादनार्थम्।

१३. त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इत्येतावाज्य-भागौ। सद्वन्तौ नाम वेदितव्यौ। संज्ञाकरणं शाखसंव्यवहारार्थम्।

१४. उत त्वेत्येषा ऋक् प्रधानस्य पुरोनुवाक्या।

१५. महीमूष्वादिका प्रधानस्य याज्या।

१६. प्रेद्धो अग्ने दीदिहि पुरो नः स्विष्टकृतः पुरोनु-वाक्या। इमो अग्ने वीततमानि हव्येति याज्या। सप्तदशसामि-धेनीका तृतीयेत्यारभ्य सर्वस्य एवमेव श्रुतत्वात्। अयमाधानकल्पः कस्माच्चायमुक्तः। वक्ष्यमाणस्तु शाखान्तरात्। ननु सद्वद्विराजोः संज्ञाकरणं विनापि शाखसंव्यवहारसिद्धिः। यथा वैराजमाज्यं

हतस्तोमीयं वेति। तथापि संज्ञा कृता। कथं नाम सार्वकामिक्यौ भूतिकामस्य मद्वन्तौ स्याताम्। दीप्यमानश्रीकामस्य विराजाविति वृद्धसंप्रदायः।

१७. चतस्र इष्टयः कार्या इति श्रुत्यन्तरम्। तन्मतानुसारिणो ऽग्नये प्रथमां कुर्युः। ननु देवतोपदेशो न कर्तव्यो याज्यानुवाक्यालिङ्गसिद्धैर्बहुदेवतावत्। उच्यते। इदमेवोदाहरणमङ्गीकृत्य ब्रूमः। अग्निं सुम्नेन जाग्टवे। एवमादिगुणसंयुक्तो ऽग्निः प्रतीयते। ननु याज्यायां गुणाभावादसंदेहः। उच्यते। नावश्यं याज्यानुवाक्ययोरुभयोरपि गुणा दृश्यन्ते। यथा शुनासीरीये। तस्मादवश्या देवतेति। अग्नये प्रथमा। अग्नये पवमानाय द्वितीया। द्वितीयात्वे पौर्णमासीविकार इत्युक्तत्वात्पौर्णमासावाज्यभागौ। अग्नये च पावकायाग्नये च शुचये तृतीया यथोक्ता। अदितये चतुर्थी यथोक्तैव।

१८. अग्ने सुम्नेन जाग्टवे पुरोनुवाक्या। उप त्वा जुह्वो मम याज्या।

१९. अर्वन्तस्त्वा हवामहे पुरोनुवाक्या। अग्निं स्तोमेन बोधय याज्या। स्विष्टकृत एते भवतः। ता वै गायत्र्यो भवन्तीति। अभिरूपा भवन्तीति लिङ्गात्।

३.

१. कर्मान्तरमासां चतसृणामिष्टीनाम्। प्रथमा च द्वितीया च समानतन्त्रे भवतः। अग्निरग्निश्च पवमानः। तत्र पवमानाश्च तन्त्रमित्युक्तम्। इष्टिवचनात्। ततसंयाज्यारूपमिति च श्रुतेः। अतश्चाग्नी

पौर्णमासावाज्यभागौ । यथोक्ता याज्यानुवाक्याः । तं हि शश्वन्त ईळते ते स्याम ये अग्नय इति स्विष्टकृतः ।

२. समानतन्त्रे भवतः । तत्राग्नेयी प्रथमा । ततः पवमानपावकशुचयस्तन्त्रं तत्र भूयसां साधर्म्यमिति न्यायेन (१३.१४.५) पावकशुच्याश्रयं तन्त्रम् । तेनामावास्याविकारः । उक्ताः प्रधानयाज्यानुवाक्याः । अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः । ततो ऽदितये तृतीया ।

३. अपरः कल्पः । पूर्वोक्तान्येव पञ्च हवींषि द्विशः कृत्वा । अग्निश्च शुचिः । अग्निश्च पवमानः । ईदृशी प्रथमा । तत्र पवमानसंबन्धि तन्त्रं । तदुक्तमिष्टिवचनात् । अतः पौर्णमासीविकारः । तं हि शश्वन्तस्ते स्यामेति संयाज्ये । अग्नये च पावकायाग्नये च शुचये द्वितीया यथोक्ता ।

४. द्विहविष इति पञ्चभिर्न संभाव्यते । तदर्थमाह । अदितिदेवत्यस्य हविष ऐन्द्राग्नो द्वितीयो भवति । ब्राह्मणस्य यजमानस्य । अत्रादितिप्राधान्यात्सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये । अदितिः उत त्वामदिते महि महीमू षु मातरमिति । ऐन्द्राग्नस्येन्द्राग्नी अवसा प्र चर्षणिभ्य इति ।

५. द्वितीयो ब्राह्मणस्य । अत्राप्यग्नीषोमा सवेदसा युवमेतानीति विशेषः ।

६. आदित्यस्य द्वितीय ऐन्द्रः । राजन्यस्य क्षत्रियस्येत्यर्थः । याज्यानुवाक्ये इन्द्रं वो विश्वतो मादयस्व हरिभिरिति ।

७. आदित्यस्य द्वितीयो वैश्वदेवः । वैश्यस्य यजमानस्य ।

८. विश्वे देवास आ गत पुरोनुवाक्या । स्तीर्णे बर्हिषि समिधाने याज्या । भारद्वाज्यौ । यत्तु ता वै गायत्र्यो भवन्तीति श्रुतिवचनं तत्तनूदेवताविषयं तत्प्रकरणात् । द्वितीय इत्यप्रधानवचनात्पूर्वोक्तास्तु अदितिप्रधानतन्त्रम् ।

९. अनन्तरं कल्पद्वयमुच्यते । तत्रैकस्मिन्कल्पे आग्नेयी शुद्धा प्रथमा । अदितये द्वितीया । अयं प्रथमः कल्पः । अपरस्मिन्कल्पे तनूदेवतासहित आग्नेयः पूर्वस्यां । द्वितीया त्वदितय एव । अयं द्वितीयः कल्पः । कुत एतत् । आग्नेयीति तद्धितनिर्देशात् । द्वयोरिति द्वयोः कल्पयोः । अनन्तरे द्वितीयावचनात् (२.३.१२) पूर्वेत्युत्तरस्यां सत्यामर्थसिद्धमेव । तथाप्युच्यते । अग्नये प्रथमामिति यदुक्तं अस्यां तस्य प्रापणार्थं। तेनाग्ने द्युम्नेनोप त्वा जुह्वो ऽर्वन्तस्त्वाग्निं स्तोमेनेति स्विष्टकृत इति सिद्धं भवति ।

१०. अयमपरः कल्पः । पुरोडाशस्याग्नेयस्य पुरस्ताद्यागात् आज्येन तनूदेवताः । आज्येनेति वचनम् । एता एव तनूदेवतासंज्ञा या आज्येनेज्यन्ते । पुरस्तात्पुरोडाशस्येति आज्यभागानन्तरम् । अग्निं पवमानं यजति । तस्य पूर्वोपदिष्टे याज्यानुवाक्ये । ततो ऽग्निं यजति । तस्याग्ने द्युम्नेनोप त्वा जुह्वः । यद्यप्यग्निर्मूर्धा भुवो यज्ञस्येति प्रथमोपदिष्टे तथापि ते न भवतः । कुतः । दग्न्यविकृताग्नेयीति ज्ञापकात् । आधानिकीनामेवातिदेशो भवति । पुरोडाशयागानन्तरं पावकशुची दिक्शब्दात् ।

११. यस्मिन्पक्षे आज्येन तनूदेवता इज्यन्ते तस्मिन्नेव स्विष्टकृतो याज्यानुवाक्ये भवतः ।

१२. उभयोरपि कल्पयोः। द्वितीयेति वचनात्।

१३. हविष्मन्तावाज्यभागावित्यर्थः। आमावास्यं द्वितीयाया इति प्राप्त एव वचनमन्येषामदितिधर्माणां प्रापणार्थम्। तेन सप्तदश सामिधेन्यो विराजौ संयाज्ये इति एतद्भवति। अन्यथा तृतीयात्व एवैते धर्माः स्युस्तत्र दृष्टत्वात्। न द्वितीयात्व इति।

१४. तन्व एतास्तन्व इष्टयः। तथा त्रैवर्णिक एवानया वृत्त्या जीवन् कृत्वा वा एवमुच्यते। तस्य शाखान्तरे विशिष्टकालसमाधानमुक्तम्। तस्यैता इष्टयः शाखान्तर एवोक्तास्तल्लिङ्गेन सूत्रकारो व्यवहरति। अतश्च नान्यस्यैता भवन्ति। तनूदेवताभिरिति तनूदेवतासंज्ञकैर्हविर्भिरेकहविष इष्टयस्त्र्यहं कर्तव्याः। एकस्मिन्नहनि अग्नये पवमानाय यथोक्ता। द्वितीये ऽहनि अग्नये पावकाय। अमावास्याविकारो ऽग्ने पावक स नः पावकाग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः। तृतीये ऽहनि अग्नये शुचये। तस्या अप्यमावास्याविकारो ऽग्निः शुचिव्रततम उदग्ने शुचयो अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः। एवमेतास्तिस्र इष्टयस्त्रिभिरहोभिः कुर्यात्। वैष्णवद्वितीयाभिरपरं त्र्यहं एवमेव व्याप्नुयात्। वैष्णवो द्वितीयो यासां ता वैष्णवद्वितीयाः। काः पुनस्ताः। तनूदेवताः। कुतः। प्रकृतत्वात्। वैष्णवस्य द्वितीयात्वेन गुणभावेन निर्देशात्तनूदेवताधीनानि तन्त्राणि। इदं विष्णुर्वषट् ते विष्णवित्ति वैष्णवस्य याज्यानुवाक्ये। आदित्यतृतीयाभिरपरम्। तनूदेवताभिरिति वर्तते। वैष्णवद्वितीयाभिरिति च। आदित्यं तृतीयं हविरासां वैष्णवद्वितीयानां तनूदेवतानाम्। आदित्यतृती-

यासां तनूर्देवता इति समासार्थः। अतस्तत्प्रधानत्वात्तदधीनानि तन्त्राणि। एवं नवभिरेताभिर्देवता इष्टव्याः। दशम्यविकृताग्नेयी। दशमे ऽहनि [1]अविकृता न तनूदेवतासंपृक्ता आग्नेय्येवेष्टिः। अविकृतेत्युच्यते आद्येन तनूदेवताः स्युः। अतश्च तनूदेवतावर्जं तद्धर्मप्राप्तिः। तेन विश्वेभिरग्ने अग्निभिरग्ने विश्वेभिरग्निभिरिति स्विष्टकृतः। अग्ने शुक्रेणोप त्वा जुह्व इति प्रधानस्य।

१५. सर्वास्वाधानेष्टिषु उपांशुहविष्टा। हविःशब्देन प्रधानं लक्ष्यते। उपांशुत्वं प्रधानदेवतायागस्येत्यर्थः। सर्वशब्दो ऽनन्तराणामेव मा भूत्।

१६. सर्वासु चशब्दात्।

१७. सर्वग्रहणमनुवर्तमानमपीह न संबध्यते। विभक्तिभेदात्। न चायं देवताधर्मो भावप्रत्ययेनानिर्देशात्[2]। अतश्च व्याहिताग्न्यां न सांप्रदयम्।

१८. सर्वास्विष्टिषु प्रतिविभज्य दीयन्ते। तन्त्रान्तरदर्शनात्। चतुर्विंशतिं दद्यादिति शतपथे। सवामेषा संख्या न्यायसिद्धा।

१९. दक्षिणा इति प्रकृतम्। द्वादश दद्याद्द्वादश वै मासाः संवत्सरः संवत्सरस्यैवाप्त्या इति श्रुतेः। यजमानो दद्यात्। नत्विक्। आजीविकास्मरणादार्त्विज्यस्य।

२०. वाशब्दो विकल्पार्थः। पूर्वयोरपि योगयोर्द्रष्टव्यः।

२१. दक्षिणेति वर्तते। असमासनिर्देशः क्रमार्थः।

२२. सुवर्णशतमानं प्रसिद्धम्। रथो युक्तः सामर्थ्यात्। वासो

---

1 B ins. अविकृता। 2 A C निर्देशात।

वत्सम्। अजश्छागः पुंलिङ्गात्। यवस्थानः स्थादग्नीध एवेनं प्रातर्दद्यादिति शतपथे। चशब्दः सर्वास्वित्यनुकर्षणार्थः। अतः प्रतीष्टि प्रतिविभज्य दानम्।

२३. आहितेष्वग्निष्वनन्तरं द्वादशरात्रं स्वयं यजमानो ऽग्निहोत्रं जुहुयात्। एतस्मादेव द्वादशरात्रनियमादेतद्धवसीयते। अन्यत्र ऋत्विगग्निहोत्रहोता। पक्षे यजमानः। क्षत्रियवैश्ययोस्तु स्वयंहोमः पक्षे ऽपि न प्राप्तः। तयोरप्यत्र[1] द्वादशरात्रमविशेषेणोच्यते। कुत एतत्। शतपथश्रुतेः। ते होचुः। को न इदं होष्यतीति। ब्राह्मण एवेति पृष्टप्रतिवचनम्।

२४. द्वादशरात्रमेव चशब्दात्।

न नर्मयुक्तं त्वनृतं[2] हिनस्ति न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि॥

(महाभारत १. ३४ १२)

इत्येवंविषयमप्यनृतमेष्वहःसु प्रतिषिध्यते। यच्च स्मार्त्ये

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते॥ (मनु ८. १०४)

एवमाद्यप्यनेन श्रौतेन बाध्यते। कर्माङ्गत्वादवश्यम्।

२५. द्वादशरात्रमेव। बहुभ्यो ऽपि बहुवचनात्। भृत्योपरोधेनापि। कर्माङ्गत्वात् सत्यवदनं चातिथिभ्यश्च दानमिति यावज्जीवं केचिदिच्छन्ति।

---

[1] A चान्यत्र। [2] B om. त A वचनं।

२६. आहिताग्निपक्षान्प्रागपौष्टिश्च एते व्रते। व्रतपक्षस्य-स्मग्नये व्रतपतय इत्यस्याः प्रापणार्थम्। अनिष्टा निरूढपशुना। तस्यैव नित्यत्वात्। मांसमर्थप्राप्तम्। न त्वग्नीषोमीयादिषु। तत्र विशेषवचनात्। ओषधीनामारण्येनानिष्टा आरण्यानाम्। ग्राम्येण ग्राम्याणाम्। ओषधयः फलपाकान्ता इति प्रसिद्धम्।

४.

१. दर्शपूर्णमासारम्भ इति श्रुतत्वात्। सोमाधाने ऽपि निवृत्ते सोमे दर्शपूर्णमासारम्भ एव। दर्शग्रहणं वसिष्ठयज्ञयाजिनस्तदारम्भे ऽपि यथा स्यात्। अन्वारम्भणीयेत्यारम्भमनुभवति। तेन सकृत्प्र-योगः सिद्धो भवति।

२. आग्नावैष्णव एकादशकपालः। सरस्वत्यै चरुः। सरस्वते द्वादशकपालः। एवमेव शाखान्तरे श्रुतत्वात्।

३. पुरोनुवाक्या।

४. याज्या।

५. पावका नः सरस्वती पुरोनुवाक्या। इमा जुह्वाना युष्मदा नमोभिः याज्या।

६. जनीयन्तो न्वग्रवः पुरोनुवाक्या। स वावृधे नर्यो योष-णासु याज्या।

७. पूर्वैः सह समुच्चयार्थश्चशब्दः। अन्वारम्भणीयामेके शाखिनः पञ्चहविषं कुर्वन्ति। त्रीणि पूर्वोक्तानि। अग्नये भगिने चतुर्थम्। अग्नये व्रतपतये पञ्चमम्। एक इति विकल्पार्थम्।

८. त्वमग्ने वीरवद्यशः पुरोनुवाक्या। त्वं भगो न आ हि रत्नमिषे याज्या।

९. त्वमग्ने व्रतपा असि पुरोनुवाक्या। यद्वो वयं प्र मिनाम व्रतानीति याज्या।

१०. उभयत्राविशेषात्।

११. उभयत्रैव चशब्दात्।

५.

१. कामेभ्यो हितं काम्यम्। पुनराधेयमिति शास्त्रसंव्यवहारार्थम्। वक्ष्यति। पञ्चकपालो पौनराधेयिकीष्टिः। याः पुनराधेये ता हविष (८. १२. ४. ५) इति। अजानानस्य कामान् कुर्वतो ऽपि काम्यानि। यस्यासंपत्तिः स एवमुच्यते।

२. उद्वासनमिहाग्न्युत्सर्गः[1]। स च पुनराधेयार्थ एव[2] प्रकरणात्।

३. पुरोनुवाक्या।

४. पृष्टो दिवि पृष्टो अग्निः पृथिव्यां याज्या। अग्नेर्वैश्वानरगुणस्य। आग्नेयस्याग्निर्मूर्धा भुवो यज्ञस्य।

५. वर्षाणां मध्ये पुनराधेयस्य सोद्वासनस्य कालः।

६. मध्यावर्ष एव। चशब्दात्सर्वत्रानिमित्ते[3]। नक्षत्रवचनात्पुनर्वस्वोः।

७. अयं वा कालः। या आषाढ्या उत्तरा अनन्तरेत्यर्थः।

---

१ AC॰ हवाग्न्युत्सर्गः। २ A एवाप्रक॰। ३ A निमित्ते।

तदेव तस्मिन्काले पूर्वपक्षे पुनर्वसुभ्यां संपद्यते यैवैषामावास्या उपरिष्टादमावास्या भवति तस्यां पुनरादधीतेति (कौ० ब्रा० १.३) श्रुतेः।

८. मध्यन्दिनो मध्याह्नः। मध्यन्दिनस्य कालः पञ्चैः सह समुच्चीयते चशब्दात् कालवचनाच्च स्वतन्त्रो ऽपि।

९. पञ्चकपालः पुरोलाशो भवतीति श्रुतेः। श्रुत्यनुकरणं तदुक्तयाज्यानुवाक्याव्यवस्थार्थं च। चशब्दादन्यत्राप्यस्मिन्पदपङ्क्त्यः।

१०. पञ्चकपाल एव चशब्दात्।

११. त्रिषु मध्यमेषु वक्ष्यमाणेषु। चशब्दान्नराशंसे समुच्चीयमाने श्रुत्यन्तर उभयोः प्रयोगदर्शनात्। अग्निशब्दाञ्च वेतु व्यन्त्विति शब्दौ विकृतौ नाभ्यधिकौ। एतस्माच्च नियमादग्नीन्यजेत्यपि संप्रैषे ऽन्यथानूहः।

१२. तनूनपादग्न ऽग्निमिति प्रयोगो मा भूदिति वचनम्। तनूनपादिति प्रदर्शनार्थमतो नराशंसयाजिनो नराशंसो ऽग्निमिति भवति। कुतः। विभक्तिभिः प्रयाजानुयाजान्यजतीति (कौ० ब्रा० १.४) विशेषश्रुतेः।

१३. वार्त्रघ्नस्त्वेव स्थित इति श्रुतिवचनात्।

१४. पूर्वे आज्यभाग इति वर्तते। अग्निं स्तोमेन बोधयेति वाग्नये बुधिमते पूर्वं कुर्यादिति हैक आहुरिति (कौ० ब्रा० १.४) श्रुतेः।

१५. अग्न आयूंषि पवस इत्युत्तरस्य पुरोनुवाक्येति श्रुतेः। अथ यदग्नये पवमानाय भियेरन्नग्नये पवमानायानुब्रूहीति ब्रूयात्सो ऽन्वाहाग्न आयूंषि पवस इत्यादि (२.२.३.२२) शतपथश्रुतेः।

१६. उत्तर आज्यभाग इति वर्तते। इन्दुमद्गुणायाग्नये वा।

उत्तर आज्यभाग इति शाखान्तरात्। अथ यदग्नय इन्दुमते निर्वपेदग्नय इन्दुमते ऽनुब्रूहीति ब्रूयात्तो ऽग्नाविष्णू सु यजतीति (२. २.३.२३) शतपथश्रुतेः।

१७. अग्निर्मूर्धा दिवः ककुदयं वा उत्तर आज्यभागः शाखान्तरात्।

१८. यथाचोदितं तथैव यजति चतुर्थ्यन्तेन। तद्यथा। जुषाणो ऽग्निः पवमानो जुषाणो ऽग्निरिन्दुमान् इत्यादि। तथा चैव शतपथश्रुतिः। यथाचोदितवचनं नियमार्थम्। ततः सार्वकामिकमाम्नातं चोदितमात्सर्यादिर्न याज्ययोः[1]।

१९. अग्ने तमद्येति पुरोनुवाक्या। एभिर्नो अर्कैरिति याज्या। अथा ह्यग्ने पुरोनुवाक्या स्विष्टकृतः। आभिष्टे अद्य याज्या। हविष इत्युक्तं व्यवहितत्वाच्चोदनाप्रकरणस्य। पदपङ्क्त्यो याज्यापुरोनुवाक्याः। व्यतिषक्ता भवन्तीति (कौ॰ ब्रा॰ २.५) श्रुतेः।

२०. अनुयाजयोरयं विकारः। अग्ने स्तोमं मनामहे ऽग्ना यो मर्त्यो दुव इति श्रुतिप्रदर्शितत्वात्।

२१. यो ऽयमग्निशब्दः षट्सु स्थानेषु तं विभक्तिसंज्ञयाचक्षते याज्ञिकाः। एतासामेषां प्रतीकानि विभक्तय इति (कौ॰ ब्रा॰ २.४) श्रुतेः।

२२. ता हविरन्तपक्षे ऽप्युपांशु। ता इत्यतिरेकात्। आगन्तु भवतीति हेतोरविशेषात्। चशब्द उत्तराभ्यां सह समुच्चयार्थः।

२३. चशब्दात्पूर्वस्य वृद्धिमान् यदि। आगन्तुत्वाविशेषात्।

---

१ C याज्यायाः।

२४. यथसु हैक उपांशु कुर्वन्ति विभक्तीरुत्तरमाज्यभागं हविरिति (कौ० ब्रा० १.५) श्रुतेः ।

२५. सर्वं वा कर्म सह पूर्वाभ्यामनुयाजाभ्यामुपांशु भवति । सा सर्वैव समामिधेनीकोपांशु भवत्या पूर्वाभ्यामनुयाजाभ्यामिति (कौ० ब्रा० १.५) श्रुतेः ।

२६. अयं वा पक्षः । हविरन्तमुपांशु भवति । श्रुत्यन्तरात् ।

२७. केवलमुपांशु भवति । शाखान्तरादेव ।

२८. संव्यायः पटः प्रावारो वा । स कौदृग्रः । जरन् जीर्णत्वाच्च पुनरुत्स्यूतः । सूच्या वा[1] संहतः[2] । कद्रूयः पिष्कृतः संस्कृतो ऽपि कुयन्तः । अनड्वान् बलीवर्दः तृतीयः । हिरण्यं वा तृतीयमेषा दक्षिणा ।

२९. द्वितीयेति सिद्धे सति वचनं पुनराधेयसोमे ऽन्वायातनप्रतिषेधार्थम् ।

३०. आमावास्यावाज्यभागौ । शिष्टं प्राकृतं तन्त्रम् ।

३१. वाशब्दो विकल्पार्थः । अमावास्याविकार इति वर्तते ।

३२. स त्वं नो अग्ने ऽवमो भवोतीति पुरोनुवाक्या । त्वं नो अग्ने वरुणस्य विद्वान् याज्या । इतिकरणादस्यां संस्थितायामग्निहोत्रहोमो न तु पञ्चकपालेष्ट्यां । कुतः संदेहः । श्रुताविदं त्वेव प्रत्यक्षं पुनराधेयस्य रूपमित्युपक्रम्य तस्यां संस्थितायां यजमानो ऽग्निहोत्रं जुहोति संस्थिते त्वग्न्याधेये ऽग्निहोत्रं हूयत इति संदेहः स्यात् । अथ याज्ञिकमीमांसकानां विप्रतिपत्तिर्दक्षिणायाम् । उभ-

---

१ C सदा वा संहतः in marg सूच्या । २ A B संहितः ।

यौर्दक्षिणा ददाति या अग्न्याधेये श्रुता याश्च पुनराधेये ताः समुच्चिताः पुनराधेये दीयन्त इति याज्ञिकाः। तथा च कात्यायनः। अग्न्याधेयिकीश्चैकश्रुतेरित्याह (४.११.१३)। मीमांसकास्तु वदन्ति। नाकृताधानः पुनराधेयाधिकारी। तेनाधाने दक्षिणा याश्चोदितास्ता दत्ताः पुनराधेये च पौनराधेयिकीर्ददाति। स एवमुभयीर्ददाति। अत्र निर्णयः। अन्यस्याः शाखाया उपलभ्य कात्यायनेनोक्तम्। अन्यशाखान्तरीयं मीमांसकैर्विचारितम्। द्वादशरात्रं स्वयंहोमी स्यादित्यादि समानमाधानेन। तथा च कात्यायनः। अग्न्याधेयवदन्यदित्याह (४.११.१४.)।

६.

१. अग्निहोत्रमिति वक्ष्यमाणस्य दर्विहोमकर्मणो नामधेयम्। तदाहिताग्निर्यावज्जीवं सायंप्रातरभ्यस्तं कुर्यात्। यावज्जीवमग्निहोत्रं जुहोतीति शाखान्तरश्रुतेः। इहापि सायं च प्रातश्चेति द्विश्चकारकरणादयमेवार्थः प्रतीयते। जुहोतिग्रहणं जुहोतिधर्मप्रापणार्थम्। जुहोतिरासेचनाधिक उपविष्टहोमः स्वाहाकारप्रदानः। सायमारम्भसायं प्रातरपवर्गः। तथा हि संप्रदर्शनाच्छतपथे। तच्चेतिकर्तव्यतोच्यते।

२. अस्तमयसंनिधौ हि प्रायेण च्छायाः संसृज्यन्ते। तस्मात्कालात्पुरा गार्हपत्यादग्नेराहवनीयं पृथक्करोति।

३. प्रातस्तनं होमं कर्तुमुद्यतः प्रभातायां रात्र्यां गार्हपत्यादाहवनीयमुद्धरेत्।

४. प्रादुःशब्दः प्रकाशनवचनः। प्रकाशीकरणं कुर्युः सर्वेषामग्नीनां नित्यधृतो यजमानाः। अस्मिन्नेवोद्धरणकाले। नित्यधृत इति बहुवचनं सर्वप्रकारार्थं ततश्च सोमे ऽप्यस्मिन्नेव काले ऽग्नीनां प्रकाशनम्। तथा च चरकाणां। दीक्षित वाचं यच्छ। पत्नि वाचं यच्छ। आग्नीध्राग्नीन्प्रज्वालयेति प्रैषः।

५. गतश्रियः प्राप्तश्रियो वक्ष्यमाणाः। शुश्रुवान्ब्राह्मणः श्रुतसंपन्नः। ग्रामणीर्ग्रामस्वामी। राजन्यस्य राजनि साधुः। क्षत्रियो वा। एते नित्यधृतो भवन्ति।

६. उद्धरणमन्त्रो ऽयं लिङ्गात्।

७. अनेन मन्त्रेण भूमौ अग्निं स्थापयेत्। मन्त्रलिङ्गात्। प्राञ्चं प्रणयेत्। तस्मात्प्राञ्चमग्निं प्रणयतीति दर्शनात्। वैश्यकुलादित्तवतो वा (आश्व० श्रौ० २.२.१) भ्राष्ट्राद्वा तूष्णीं गार्हपत्याद्वितीये दक्षिणतो दक्षिणाग्निं स्थापयेत्। शाखान्तरश्रवणात्। अस्माकं तु समानयोनिकावाहवनीयदक्षिणाग्नी। अरण्योर्निर्गार्हपत्यः। तस्मादितरौ। अथ यदरण्योरग्नीन्समारोहयत इति लिङ्गदर्शनात्।

८. अह्ना यदेन इत्यत्र रात्र्या यदेन इति विकारः। प्रातर्होमार्थ उद्धरणे।

९. प्रदक्षिणमग्नेः समन्तात्पाणिना सोदकेन त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षत इति प्रत्योक्तेन विधानेन परिसमुह्य होष्यन् होमं करिष्यन्नित्यर्थः। अतो न कृत्वा परिसमूहनं पर्युक्षणवत्। होमकालेनैव परिसमूहनपर्युक्षणे होष्यन्निति वचनात्।

१० ऋतं त्वा सत्येन इत्येवमादिना मन्त्रेण त्रिस्त्रिर्वीप्सानि-

दैर्घ्याच्छान्तराहुतिः। एकैकमग्निं पर्युक्ष्य धारां नयेदिति वाक्यपरिसमाप्तिः। कृत्वा चैवमेव पर्युक्षणं। लाघवार्थमित्येवोक्तम्।

११. प्रातर्होमे सत्यं त्वर्तेन परिषिञ्चामीति पर्युक्षणम्।

१२. यज्ञस्य संततिरसीत्येवमादिना मन्त्रेण गार्हपत्यादारभ्याविच्छिन्नामुदकधारां आहवनीयात् अभिप्राप्याहवनीयं धारां नयेत्। एवमेव शाखान्तरश्रवणात्।

१३. होमकाल एवैतत्प्रायश्चित्तं प्रकरणात्। यदि प्राग्धारादानादग्नीनामन्तरा श्वापदो यायात् ततस्तन्तुं तन्वन् रजसो भानुमन्विहीत्येवमादिना मन्त्रेण धारां दद्यात्। अथो ह वाव पशवो ऽमेध्या दुर्वराह एडकः श्वेति शतपथे (१२.४.१.४) विशेषश्रवणादेतेष्वेवान्तरा गच्छत्सु प्रायश्चित्तम्।

७.

१. प्रथमास्तमिते ऽस्तमितमात्रे इत्यर्थः। सायमस्तमिते पुरा तमसस्तस्मिन्काले जुहुयादिति (कौ० ब्रा० २.८) श्रुतेः।

२. वाशब्दो विकल्पार्थः। अथवर्क्षमेकदिवसपथोन्नेदकाले जुहुयात्। एवमपि शाखान्तरात्।

३. प्रातस्तमो होमकालः। उपोदयमुदयसमीपे विगतायामुषसि। प्रातः पुरोदयादपहते तमसि तस्मिन्काले जुहुयादिति (कौ०ब्रा०२.८) श्रुतेः।

४. वाशब्दो विकल्पार्थः। प्रथम इति वर्तते। प्रथमोदित आदित्ये जुहुयादेवमपि शाखान्तरे श्रुतत्वात्।

५. पुरस्ताद्यो ऽभिहितः कालः प्रथमास्तमिते प्रातरुपोदयं व्युषिते तत्रैव मनः कुर्यात्। इतरौ तु कालौ पश्चादभिहितौ। दृश्यमाने वा नक्षत्रे उदिते वेति तौ मनस्यपि नारोपयेत्। ननु प्रतिषिद्धयोः किमर्थमुपदेशः। ज्ञापनार्थः। यत्र स्वश्रुतिरस्ति तत्र शाखान्तरं विद्यमानमपि नादर्तव्यम्। तुशब्दो नियमार्थः। ततः कौण्डपायिनामयने ऽप्ययमेव कालः। अपरे त्वादिविकल्पार्थमेतत्सूत्रं व्याचक्षते।

६. अत एव प्रथमास्तमितानुदितयोर्होतव्यं येन तस्यापराधे प्रायश्चित्तं श्रुत्यन्तरे पठ्यते। इतरथा हि उदिते ऽपि विधानादपराधाभावात्प्रायश्चित्तविधानमनर्थकं स्यात्। आदिसंकल्पितस्येति व्याख्यान्तरम्।

७. यदि संस्कृतं हविरादित्यो ऽभ्युदियात्ततस्तदाहवनीयस्योत्तरार्धमुपनीयानुष्णसंस्तावदासीत यावत्तमनमुष्णामाभिकाङ्क्षा। ततः समिदाधानानन्तरं यथाप्राप्तमाहुतिद्वयं हुत्वा प्राग्या यज्ञस्येत्येतस्याऽऽख्यापाद्वरं दत्त्वा गौर्ब्राह्मणस्य वर इति। ततो भूरिति पूर्वस्या आहुतेरनुमन्त्रणं चरकश्रुतेः। स्वयंहोमी पूर्वलिङ्गे अन्यस्मै ब्राह्मणाय वा दद्यात्। प्रोषिते ऽपि च दानमन्वाहार्यवत्। कौण्डपायनीये सत्त्वाद्दानम्। अहुताभ्युदित एवैतत्प्रायश्चित्तम्। नेतरत्र। तथा श्रवणात्। निष्पन्ने चाहवनीये होमे ऽभ्युदये सर्वप्रायश्चित्तम्। विशेषप्रायश्चित्तावचनात्[1]। अनुद्धृताभ्यस्तमये च नैतत्। अभ्युदितमिति हविषो निर्देशात्।

---

१ C विशेषात्। प्रायश्चित्तावचनात् B ०वचन०।

८. अथवा अजुह्वन्नेव तदभ्युदितं हविः उद्वास्य अपनीय पूर्वमुद्धृतमाहवनीयं अन्यं प्रणीय विना मन्त्रेण। प्रणीयेति शब्दान्तरेण निर्देशात्। जुहुयादिति होममात्रोपदेशाच्च परिसमूहनादिः। होमार्थस्यैवैतत्। न साधारणस्य। विरोधात्।

९. पयो ऽग्निहोत्रीक्षीरम्। न लौकिकम्। यवागूः पाकविशेषो विरलद्रवा। सा च व्रीहियवयोरन्यतरद्रव्यका। दधि गव्यं अनग्निहोत्र्या अपि। तथैवाज्यम्। इति नित्यानि कामसंयोगं विनाग्निहोत्रहवींषि। पयसा जुहुयादेष ह वै सर्वासामोषधीनां रसो यत्पयो सर्वैरेव तद्रसैरग्नीन्प्रीणातीति (कौ॰ ब्र॰२.१) श्रुतेः। तद्वा आहुर्यदशनस्यैव जुहुयादिति च।

१०. दध्नो नाधिश्रयणमुदग्निरूढेषु समिधमादीप्यावज्योतनमपां प्रत्यानयनं पुनरवज्योतनं च भवति।

११. आज्ये ऽग्निहोत्रहोमार्थत्वेनादिष्टे नापः प्रत्यानयति। श्रुत्यन्तरात्। ततो ऽधिश्रयणमवज्योतनं पुनरवज्योतनं च भवति। यानि पुनर्होमद्रव्याणि शाखान्तरेषु श्रुतानि। तद्यथा। तण्डुलैर्बलकामो मांसेनाभिचरन्नोदनेनान्नाद्यकामो ऽद्भिर्दृष्टिकामः सोमेन यज्ञकामस्तैलेन वर्चस्काम इति वचनानि[1]। तेषां च तत एव यथाश्रुताः संस्काराः कार्याः।

१२. अयमपरो विशेषः[2]। आज्यस्योद्वासितस्य सतः कुशतरुणे ऽच्छोत्पवने तूष्णीमाज्ये प्रत्यस्य तत्तयोरेव पवित्रयोरुत्पवयेत्।

---

१ B वचनात्। २ C विकल्पः।

इदं धारादानं प्रायश्चित्तप्रसङ्गानुप्रसक्तम्[1]। इदानीं धारादाना-दनन्तरं यत्कर्तव्यं तदुच्यते।

१३. अन्वाहार्यपचन इति दक्षिणाग्नेः संज्ञा। तस्मादुत्तरतः पश्चात्स्थितः प्रत्यङ्मुखो यजमानस्तिष्ठन्नृजुकायावस्थ आदित्यमुपतिष्ठते। स्तुत्या अनुकूलयति। सत्य ऋताय त्वेत्येवमादिना मन्त्रेण। सायं सायंतने होमकर्मणि। अस्तमितश्चेद्गार्हपत्यमुपतिष्ठतेति छन्दोगानाम्। तमप्येतस्मिन्नेव देशे स्थितः अनेनैव मन्त्रेण। पूर्वाह्णे चेदुद्धवनीया समाप्यते तत्र संस्थितायां सायमग्निहोत्रं जुहोतीति वचनात्। तत्रादित्योपस्थानं प्राङ्मुखः कुर्यात्। उपस्थानस्य तथा न्यायात्।

१४. प्रातर्होमे यजमान आहवनीयं समीपे स्थित्वोपतिष्ठते। ऋत सत्याय त्वेत्येतेन मन्त्रेण।

१५. उत्तरेण देशेनान्वाहार्यपचनं यजमानस्य संचरः। प्रवेशनिष्क्रामौ। यजमानवचनाच्च केवलमग्निहोत्रे।

१६. दक्षिणदेशस्य पश्चादाहवनीयादवधेरासनं यजमानस्य सर्वत्र। तस्माद्दक्षिणवेद्यन्तमधिस्पृश्यासीतेति शतपथे।

१७. दक्षिणतःपश्चाद्गार्हपत्यादित्यर्थः।

१८. इष्टिरसीत्येवमादिना मन्त्रेणाप आचामति मन्त्रलिङ्गात्।

१९. यजमान एव यथाब्दात्।

---

१ A om. प्रायश्चित्त B ०मुक्तं A B add कश्चित् after सक्तम्।

८.

१. दक्षिणतो वितानस्याग्निहोत्रीमग्निहोत्रहोमार्थां धेनुमुपसृजन्ति सवत्सां कुर्वन्ति। ये तत्र परिचारकाः। बहुवचनमविवक्षितम्। तेन द्वौ वाप्येको ऽपि वा। अग्निहोत्रीति संज्ञा व्यवहाराय।

२. उपसृष्टारो यजमान ऋत्विक् च बहुत्वात्। एते ऽग्निहोत्र्या ग्रीवां चान्तरेण न संचरेरन्।

३. शूद्रेणाग्निहोत्रीं न दोहयेत्। न चोपसर्जयेत्। स्वयमुपसर्जनदोहनेन विरुध्यते स्वान्तत्वात्।

४. अग्नये देवेभ्यो धुक्ष्वेत्येतत्सायं जपति। होमयिता। सायंसंयोगेन विधानान्न मध्यन्दिने।

५. सूर्याय देवेभ्यो धुक्ष्वेतीमं मन्त्रं प्रातर्जपेत्। या या पूर्वाहुतिस्ते देवा इत्यनया कल्पनया देवेभ्यो धुक्ष्वेति। दक्षिणाभ्यासत्यभिप्रायं वा।

६. अशनायापिपासे इत्यादिकं मन्त्रं सायंप्रातर्जपेत्। सायंप्रातरित्युच्यते। प्रायेणाशनायापिपासे अहन्येव पीडाकरे इति कस्यचिदाशङ्का। सा मा विशायीति।

७. अग्निहोत्र्या अन्वाहार्यपचनेन वीरेणेति एवं स्त्रीवत्सायां गवि जपेत्।

८. उदीच इत्यनुच्यमाने प्राचां निरूहणं स्यात्। एषा हि तस्य दिक् प्रज्ञातेति श्रुतेः। अनधिश्रयणीये ऽपि होमद्रव्ये निरूहणमवद्योतनार्थम्। यस्तामङ्गाराण्करोतीत्यविशेषश्रुतेः (कौ० ब्रा० २. १)। उदग्निरूढेष्वधिश्रयणम्। उत्तरत उपाचार इति परि-

भावितत्वात्। गार्हपत्येन वीरेखेति विकार इति नियमार्थः। तत कौखपाथिनीये[1] न प्राजहितेन वीरेखेति। ननु स गार्हपत्यो ऽत इति वचनाच्छाखामुखीय एव श्रयणं प्राप्नोति। नेति ब्रूमः। मांसमग्निहोत्रं जुहोतीति शाखा धर्मातिदेशात्प्राजहित एव गार्हपत्यः। शाखामुखीय एव च होमो[2] वचनात्। [3]तदितराश्वनीयमुपकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयादिति प्रतपद्ये।

९. यदधिश्रितं तद्गार्हपत्य उत्तरतो निरूढेष्वङ्गारेषु समिधमादीप्याग्नेहा वचुषावेद्य इत्यनेन मन्त्रेणावज्योतयेत्। अथ यदधिश्रित्यावज्योतयतीति श्रुतत्वात्।

१०. समाप ओषधीनां रसेनेत्यनेन मन्त्रेण स्रुवेणापः प्रत्यानीय। अथ यदपः प्रत्यानयतीति स्वश्रुतिः (२. १)। स्रुवेण मन्त्रस्य शाखान्तरात्।

११ प्रतितप्यापः तूष्णीं पुनरवज्योत्य। अथ यत्पुनरवज्योतयत्यप एव तच्छ्रपयतीति (२. १) श्रुतेः। प्रतितप्येति तूष्णीमिति शाखान्तरात्।

१२. त्रिरित्युपसादनादृत्तिः। उपसादमिति णमुल्। उपसाद्योपसाद्येत्यर्थः। उदगिति दिङ्नियमः। त्रिरुपसादमुदग्घोमीयमुद्वासयतीति (२. १) श्रुतेः।

१३. एवमुपसाद्यमुद्वासयेत्। अनुच्छिन्दन्निव हरेदिति (२. १) श्रुतेः।

१४. नमो देवेभ्य इत्यनेन मन्त्रेण गार्हपत्यस्य ये दक्षिणतो

---

१ A om. न। २ C चाखोमो। ३ C (orig) न चि नदनकल्पते।

ऽङ्गारांस्तानुपस्पृशेत्। अथोपवेशेन दक्षिणतो ऽङ्गारानुपस्पृशति नमो देवेभ्य इति श्रुतेः।

१५. सुभूताय व इति अनेन मन्त्रेण ये उदीचो ऽङ्गारास्ता-न्प्रत्यूहेत्। प्रतिपादयेदित्यर्थः। तथा प्रत्यूहेद्यथा सुप्रत्यूढा भवन्ति[१]। तथा चैव श्रुतत्वात्।

१६. गार्हपत्ये संस्कारा इति तन्त्रान्तरे परिभाषितत्वात्। गार्हपत्ये स्रुवं प्रतितप्य स्रुचं चानेन क्रमेण प्रत्येकं द्विस्त्रिकारकर-णात्। उन्नयति स्थालीतः। स्थाल्याः स्रुवेणोद्धृत्य स्रुचि उन्नयति[२]। अशनायापिपासीयेन मन्त्रेण स्रुचा स्रुवेण वीरेणेत्येतावान्विकारः।

१७. चतुरावृत्तं वा पञ्चावृत्तं वा विकल्पः। चतुरुन्नयेच्चतु-ष्टयं वा इदं सर्वमस्यैव सर्वस्याप्त्यै पञ्चकृत्व उन्नयेत्पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्या इति (२. १) श्रुतेः।

१८. उन्नीयमाने प्रतिस्रुवं मन्त्रावृत्तिः शाखान्तरात्। मन्त्रो ऽपि शाखान्तरादेव।

१९. उन्नीते सर्वस्मिंश्च प्रतिस्रुवम्। स्रुचं स्रुक्पुष्करं संस्पृ-शेत्। स्रुवं स्थाल्यां मुक्त्वा शाखान्तरात्।

२०. सजूर्देवेभ्य इत्यादिकं मन्त्रं सायं जपेत्। सम्भुपस्पर्शन-मन्त्रो[३]मा विम्नायीति जपतीत्युक्तम्।

२१. प्रातरयं जपः। कौषुडपायनीये[४] मध्यन्दिने ऽपि शाखा-न्तराद्धोमः। तच्च तत एव यथोक्तम्।

---

१ A सुषमाः भ। २ A निनयति B om. उद्ध। ३ A उपस्पर्शने। ४ Mss. कु॰

२२. विकार इति वाक्यशेषः। तथापि व्यवस्थानि स्वपदशो व्याख्यायन्ते। उत्तरेण गार्हपत्यमदूरे स्रुचमुपसाद्य। उदीचोत्तरेण गार्हपत्यमुपसादयतीति (२. २) श्रुतेः।

२३. प्रादेशप्रमाणां पालाशीं समिधमाधाय स्रुचं च दक्षिणेनैव पाणिना। अधस्तात् स्रुगुपरिष्टात्समित्। मात्रशब्दो [1]लोके तावद्दीर्घन्यूनातिरिक्ते दृष्टस्तथैवात्रापि ग्राह्यः।

२४. तत् स्रुक्समिधं समया समीपेन गार्हपत्यमुपरिष्टान्नयेत्। शाखान्तरात्।

२५. आहवनीयस्य पश्चादपरत उदगग्रेषु दर्भेषु दर्भमये विष्टरे स्रुचं स्थापयित्वा आहवनीये होष्यन् द्वितीयमुपसादयतीति (२. २) श्रुतत्वात्।

२६. समिधमभ्यादधाति जुहोतीत्यर्थः। अग्रनाद्यापिपाथे इत्येवमादिना मन्त्रेण समिधाहवनीयेन वीरेणेत्येतावान्विकारः। पालाशीं समिधमभ्यादधाति सोमो वै पलाशः सा प्रथमा सोमाहुतिः प्रादेशमात्री भवतीति च (२. २) श्रुतेः।

२७. द्व्यङ्गुलं समिधमतिक्रम्य तस्या एवमुपरि जुहोति। अग्निर्ज्योतिर्ज्योतिरित्यादिना मन्त्रेण। द्व्यङ्गुलं समिधोऽतिहृत्यानुदृभन्निवाभिजुहोतीति (२. २) श्रुतत्वात्। तथा स वै सायं जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निरिति।

---

[1] A B लोकवदो०।

९.

१. तथैव समिधं हुत्वा सूर्यो ज्योतिरित्यादिना मन्त्रेण प्रातर्जुहुयात्।

२. अवघट्टाराख्याहुतिषु सर्वत्र दक्षिणं जानु न्यक्कृत्य जुहुयात्। प्रक्रान्ताहुतिप्रसङ्गेन परिभाषेयम्।

३. उपसाद्य स्रुचं हुत्वा तृतीयमिति श्रुतेः। उत्तरामाहुतिं जुहोति। असंसृजन्पूर्वया सह संसर्गमकुर्वन्। तूष्णीममन्त्रिकां प्रजापतिं मनसा ध्यात्वा। बहुतरां पूर्वस्या आहुतेः। उत्तरावतीराहुतीर्जुहुयादिति (२.२) श्रुतेः।

४. [1]अतिशयेन बहु स्रुचि कुर्यात्।

५. स्रुक्पुष्करस्य बुध्नेन अङ्गारानुपस्पृश्य द्विरुदीचीं उदगञ्चितां स्रुचमुत्क्षिप्योपसादयेत्। स्रुचो बुध्नेनाङ्गारानुपस्पृशति। तथा द्विरुदीचीं स्रुचमुद्यच्छतीति श्रुतत्वात्।

६. अगन्प्राण इत्येवमादिना मन्त्रेण यजमानो नेतरो होता पूर्वामाहुतिं सचणं हुत्वा प्राणं मुञ्चति मन्त्रान्तेन।

७ आगन्नपान आत्मानमित्येवमादिना मन्त्रेणोत्तरामाहुतिमन्ववानिति। वायुमभ्यन्तरं गमयति। प्रोषितस्याप्येतौ मन्त्रौ भवतः। आहुत्यनन्तरमेव पाठात्।

८. या यज्ञस्येत्येवमादिको जप आर्त्विजः। या वै यज्ञस्य समृद्धस्याशीः सा यजमानस्य भवतीति व्यपदेशात्।

---

१ C in marg. उत्तराहुतेर्भूयो द्रव्यं पूर्वाहुतेर्भूयिष्ठं भवति तथा भक्षार्थं स्रुचि शेषयेत्। पूर्वाहुत्यर्थं प्रक्षिप्ताद्द्रव्यादुत्तराहुत्यर्थं भूयो भवतीति तस्मादपि भूयो भक्षार्थं भवति। तस्योत्तराहुत्यपेक्षया भूयिष्ठमित्युच्यते। यत्र उत्तराहुतेर्बहु पूर्वाहुतेः।

९. कृतयोराज्ययोरुत्तरत उत्तरे देशे प्रतीचीं प्रत्यगभिमुखीं स्रुचं सायंतने होमकर्मणि द्विरुपशोधयति हस्तेन। तामुत्तरतः सायमुपमार्ष्टि प्रतीचीमिति (२.२) श्रुतेः।

१०. उपमार्ष्टीति वर्तते। पुष्करस्य दक्षिणं प्रदेशं लेखान्त उपमार्ष्टि[1]।

११. कुशेषु स्रुग्धारणार्थेषु पूर्वमुपमार्जनं निक्षिप्येदोषधीः प्रीणामीति ध्यायन्। यत्पूर्वमुपमार्ष्टि तत्कूर्चे निक्षिप्यतीति (२.२) श्रुतेः। उत्तरत उपाचार इति परिभाषणादयेषु।

१२. यदुत्तरं तदेवं प्रतिपादयेत्। सहैव तेन पाणिमुत्तानं दक्षिणेन कूर्चं निदध्यात्[2]। पितॄन्प्रीणामीति मन्त्रं मनसा ध्यायन्। प्राचीनापवीती अप उपस्पृशेत्। यद्द्वितीयं तद्दक्षिणेन कूर्चमुत्तानं पाणिं निदधाति पितॄंस्तेन प्रीणातीति (२.२) श्रुतेः।

१३. द्विः प्रदेशिन्या प्राश्नात्यारभ्य प्रागुदीचीमुद्दिशतीति सूत्रच्छेदः। तथापि तु स्ववन्तानि खण्डश उच्यन्ते। प्रदेशिन्यङ्गुष्ठानन्तरा। तथा कृतशिष्टं द्विः प्राश्नोपश्छिमच्छब्दवदित्यर्थः। अथ यद्द्विः प्रदेशिन्या प्राश्नातीति (२.२) श्रुतेः।

१४. स्रुचमुदङ् पर्यावृत्य श्रुत्यन्तरात्।

१५. तथा स्रुचा प्राग्दण्डया भक्षयित्वा शाखान्तरात्।

१६. तां प्रत्यग्दण्डां पर्यस्य परिक्षिप्य।

---

१ B लेखां तत्र उप॰ C लेखा न उप॰। २ Paddhati कुशमूले उत्तानं पाणिं कुर्वन् पितॄन् प्रीणामीति निक्षिप्यत्युत्तरमुपमार्जनम्।

१७. जिह्वया नितरामास्वाद्य। अथ यत् स्रुचं निर्लेढि सर्पदेवजनांस्तेन प्रीणातीति (२.२) श्रुतेः।

१८. तामेव स्रुचं प्रक्षाल्य। अथ यत् स्रुचं मार्जयते रक्षोदेवजनांस्तेन प्रीणातीति (२.२) श्रुतेः।

१९. अनन्तरमाचम्य।

२०. प्रागुदञ्चिता अप आसिच्य तयैव स्रुचा प्रकृतत्वात्। अथ यत्प्रागुदीचीरप उत्सिञ्चतीति (२.२) श्रुतेः।

२१. तां स्रुचं प्रागुदञ्चितामुद्यमयति। अथ यत्प्रागुदीचीं स्रुचमुद्दिशतीति (२.२) श्रुतेः। स्रुचा भक्षयति स्रुचं निर्लेढीति हस्ते संपादयेत्। हस्तस्य स्रुक्संपत्तिदर्शनाच्छाखान्तरेषु। तदाहुः। कथमस्यैते पुरोनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्तीति। एतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरोनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येदमेव कपुष्कलमयं[1] दण्ड इति (शतपथब्रा० ९.३.१.१६) अभिनयेन[2] हस्तं दर्शयति। तस्माद्धस्तेन प्राशनं हस्तस्य[3] निर्लेहनं। शिष्टाचारश्च एवमेव।

२२. एकस्मिन् होम एकहोमः। यदुक्तं तदेकहोमे ऽपि कर्म भवति। परिसमूहनपर्युक्षणे होमप्रयुक्ताशङ्कया न प्राप्नुतः। तदाशङ्कानिवृत्त्यर्थं वचनम्। अतश्च यत्पूर्वमुक्तं यच्च वक्ष्यमाणं तत्सर्वमेकहोमे ऽपि भवति। आहवनीय एव जुहुयादिति हैक आहुरिति (२.२) वचनात्।

१ B ०म्यप०। २ A चनभिमर्दन। ३ A हस्तद्वयस्य।

२१. ततः सर्वेषु न केवलमाहवनीये गार्हपत्यदक्षिणाग्न्योरपि। तुशब्दः स्वमतप्रकटनार्थः। सर्वेषु त्वेव जुहुयात्। पूर्णास्रुदकस्य स्रुचमुत्तरेण गार्हपत्यमदूरेण निधायावस्थाप्य।

१०.

१. इह पुष्टिमित्यादिभिः समन्त्रिकास्तिस्रः। एका त्वमन्त्रिका इति गार्हपत्ये।

२. पूर्णां स्रुचमिति स्रुग्ग्रहणात्स्रुवेणैता आहुतयः। तूष्णीमिति वचनादसंसृजन्नुत्तरतः। चतुर्थीति वचनं पुष्टिपतिर्दधातु जनयन्निति मन्त्रान्तो मा विज्ञायीति। गार्हपत्यग्रहणं यावन्तो गार्हपत्यास्तावत्सु कुण्डपायनीये होमः। समिधमाधाय होमः। आहुतिस्तस्मिन्धि वसतीति श्रुत्यन्तरदर्शनात्। अन्वाहार्यपचनग्रहणं गार्हपत्यवत्। तत्सवितुर्वरेण्यमित्यृक्संदेहनिरासार्थं चतुर्थीग्रहणम्।

३. भूर्भुवः स्वरित्येता महाव्याहृतयः प्रसिद्धाः। ताभिः प्रतिमन्त्रं तिस्र आहुतयः। तिस्र इति वचनाच्च पूर्वाभिः सह समुच्चयः। ब्रह्मवर्चसकामस्य फलसंबन्धेन पक्षान्तरम्।

४. अग्नये ऽन्नादायान्नपतये स्वाहेत्येषैव चतुर्थी। न तु व्याहृत्युपहिता।

५. याः स्रुचि स्थापिता आपस्तास्त्रेधा करोति। कथम्। अग्निहोत्रस्थाल्यां भागः। तथा गार्हपत्यस्य पश्चाद्भागः। अन्यस्मै च

पत्न्यास्तृतीयो भागः। यद्यप्यनाज्यभुका पत्नी बह्व्यो वा पत्न्यस्तथापि वैधमेव। आरम्भसामर्थ्यात्।

६. अनाज्यभुकायां पत्न्यामासनप्रदेशे तूष्णीमपो निषिञ्चेत्। अञ्जलौ मन्त्रवचनात्। एकवचनं च विवक्षितम्। ततः पत्नीबहुत्वे ऽपि एकैवाञ्जलिं[1] प्रतीच्छेत्।

७. स्रुचैवापस्त्रिषु स्थानेषु कृत्वा तां प्रतितप्य गार्हपत्ये ततो निदधाति स्थापयति।

११.

१. दक्षिणतः स्थितस्य न्यायवचनादुदङ्मुखस्य प्राङ्मुखस्य वा यथासम्भवम्।

२. उपप्रयन्तो अध्वरम्। अयमग्निः सहस्त्रिणो वाजस्य शतिनस्पतिः। उभा वामिन्द्राग्नी आहुवध्यै। अयं ते योनिर्ऋत्वियः। अयमिह प्रथमो ऽधायि धातृभिः। अस्य प्रत्नामनु द्युतम्। एतासां पञ्चानामित्युच्यते किमर्थम्। केषां चिच्छाखिनामन्यः क्रमः। तद्व्युदासार्थं। तदेतत्समाप्त्यर्थं वचनम्। तस्य त्रिः प्रथमां त्रिरुत्तमामिति। तस्योपवती प्रथमा प्रजावत्युत्तमेति। तथा च वै त्रिः प्रथमां जपति त्रिरुत्तमामिति (शतपथब्रा० २.३.४.१७) च। अतश्च जपित्वेति सूत्रशेषः।

३. आयुर्दा इत्येवमादिकं मन्त्रं जपित्वा ततः।

---

१ C एकाञ्जलिं। (sec. h) प्रत्यञ्चन्।

४ चित्रावसो स्वस्ति ते पारमशीय इमं मन्त्रं विजपति।

५ सं त्वमित्यादिकं मन्त्रमुपविश्य जपेत्। अथासीनः सं त्वमग्ने सूर्यस्य वर्चसागथा इति (शतपथब्रा॰ २. ३. ४. १७)।

६. अभ्य स्थ इत्येवमादिना मन्त्रेण अग्निहोत्रीं गामभ्येति प्रकरणात्। अथ गामभ्येत्यम्भाम्भो वो भक्षीय मह स्थ महो वो भक्षीयेति शतपथश्रुतेः (२. ३. ४. २५)।

१२.

१. संहितासि विश्वरूपूर्जा माविश गौपत्येनेत्यनेन मन्त्रेण अग्निहोत्र्या ललाटमुपस्पृशेत्।

२. उप त्वाग्ने दिवेदिवे इति तृचेनाग्ने त्वं नो अन्तम इति द्वैपदेन तृचेन गार्हपत्यमुपतिष्ठत इति वाक्यशेषः। स गार्हपत्यमुपतिष्ठत उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसीति शतपथश्रुतेः (२. ३. ४. २८)। अथ द्विपदा अग्ने त्वं न इत्यादि।

३. इड एहीत्यादिना मन्त्रेणाग्निहोत्रीं गामभ्येति प्रकरणात्।

४. काम्या एतेत्येवमादिना मन्त्रेणाग्निहोत्रीवत्सस्य ललाटमुपस्पृशेत्।

५. सोमानं स्वरणमित्यनेन तृचेनोत्तरतः स्थितः प्राङ्मुखो ऽन्वाहार्यपचनमुपतिष्ठते। अथान्तरेणाहवनीयं च गार्हपत्यं च प्राङ् तिष्ठन्नग्निमीक्षमाणो जपतीति शतपथश्रुतेः।

६. अन्तरेण गार्हपत्याहवनीयौ स्थितो मयि श्रीणामयो ऽस्त्विति सूक्तं जपित्वा तत आहवनीयमुपतिष्ठते।

७. तत्सवितुर्वरेण्यमित्यस्याः श्रुतिः। अथ सावित्री। कदा चन स्तरीरसीति वालखिल्यासु। अस्याः श्रुतिः। अथैन्द्री। परि ते दूलभो रथः। अस्याः श्रुतिः। अथाग्नेयी। तथा चिरेतां जपतीति शतपथश्रुतयः[1]। एवं यजमानेनाहवनीयोपस्थाने कृते ऽनन्तरमाज्ञि-ल्यम्।

८. सर्वेषु त्वेव जुहुयादिति स्वश्रुतौ (कौ॰ ब्रा॰ २. ३) प्रयत्ना-द्यमेव पक्षः सूत्रकारस्याभीष्ट इति ज्ञापनार्थस्तुशब्दः। महाव्याहृ-तिभिस्तिसृभिर्मन्त्रैः प्रत्येकम्। तिस्रस्तिस्रः समिधो ऽभ्यादधाति यो जुहुद्भवति। यजमानो ऽन्यो वा। यः पुनरेकहावी एकहवन-साधुकारी स आहवनीय एवाभ्यादध्यात्। यजमानो ऽन्यो वा।

९. वाचं विसृजत इति सूत्रान्तः। याजमानमेतन्मन्त्रार्थसाम-र्थ्यात्। दैवस्तन्तुरसीत्यादिना मन्त्रेण आहवनीयस्य दक्षिणतो ऽङ्गारमुपस्पृशेत्[2]।

१०. ततो ऽसि तन्तुरसीत्येवमादिना मन्त्रेण सुवीर्येणेत्येव-मन्तेन आहवनीय एव प्रार्थ्यते। मानुष इत्यारभ्य पुत्रग्रहणान्तो[3] मन्त्रः। यावत्पुत्रमावर्तते पक्षे। आमन्त्रितान्तेनाभिव्याहरणमसा-वित्यस्य स्थाने पुत्रनामग्रहणम्। वाक्यार्थसामर्थ्यात्। अन्मना

[1] शतपथब्रा॰ १.९.४ १०. Kāt Śr S. IV. 12, 10 (Comm.) Kāt. Paddh. pag. 396, 19. Śāṅkh. Paddh. fol. 20 तत्सवितुर्वरेण्यं कदा चन स्तरीरसि परि ते दूलभ इति त्रिः त्रिभिराहवनीयमुपस्थाय। [2] B ॰राम्। [3] A मानवग॰।

ष्येष्टम्। सुब्रह्मण्यादर्शनात्। दीक्षितस्यापि नामग्रहणमविशेष-श्रुतेः। जीवतां नामग्रहणं भवतीति वचनात्।

११. आत्मनो ऽग्नीध्रीयादविद्यमानपुत्रः वचनसामर्थ्यात्। अपुत्र इति वक्तव्ये ऽजातग्रहणं पुंस्त्वविज्ञानार्थम्। पुत्राधिकारे पुनःपुत्र-ग्रहणाच्च चैत्रादीनां। न दुहितुः। न शूद्रस्य। त्रयाणां वर्णा-नामित्यधिकारात्।

१२. मत्येनावभृथमित्यनेन मन्त्रेणाचम्य यजमानो वाचं विसृ-जते। अथ यदप आचम्य व्रतं विसृजते ऽस्यैव तद्व्रतं दधाति। ता अस्य व्रतं गोपायन्त्या पुनर्होमादिति (कौ० ब्र० २. ४) श्रुतेः।

१३.

१. पूर्वमसंयुज्य विहितत्वान्माध्यन्दिने ऽपि भवति कुण्डपाय-नीये। अनुपस्थानं वा प्रातरिति (२. १२. ८) प्रतिषेधो ऽग्न्या-धानादिशेषाधिकारादस्यैव भवति। न तु यत्पूर्वमुक्तमृत सत्याय त्वेति।

२. याजमानमधिकृतं। भूर्भुवः स्वरित्येवमादिना मन्त्रेणाहव-नीयमुपतिष्ठते।

३. दक्षिणतःपश्चादाहवनीयादासनमित्युक्तं। तत्रोर्ध्वं त्वाहव-नीयोपस्थानं कृत्वा तस्मिन्नेव देशे स्थित इतरावग्नी उपतिष्ठते। अन्वाहार्यमप्येतच्छाखान्तरीयादवचनात्कर्तव्यम्। एकदीक्षे चोपस्थान-मिति (५. ४. ३)। तत्राप्येवमेवेच्छन्ति।

४. अभयं त इत्येवमादिना मन्त्रेण गार्हपत्यमुपतिष्ठते।

५. अभयं न इत्येवमादिना मन्त्रेणान्वाहार्यपचनमुपतिष्ठते। अन्वाहार्यपचनो दक्षिणाग्निः।

६. उपतिष्ठत इति वाक्यशेषः। तन्त्रेणोपस्थानम्। बहुवचनात्। तत्रैव स्थितः। तुल्यत्वाद्देशस्य।

७. समानं तुल्यं सायंतनेन यत्रार्त्विज्यं यच्च याजमानम्। महाव्याहृतिभिस्तिस्रस्तिस्रः समिधो ऽभ्यादधातीत्यत आरभ्य यावद्व्रतं विसृजत इति। किमन्यदास्ते येनैवमाह। एतत् ज्ञापयति। सायमपि व्रतविसर्जनादनन्तरं पर्युक्षणं भवति यजमानस्य। इतरस्य समिदाधानात्।

८. अनेन अथ प्रातरित्यादिना (२. १३. १) पक्षे सायमपि याजमानं भवति। पक्षे सायं वात्सप्रेण। एवकारकरणाद्यस्मिन्नपि पक्षे प्रातरनुपस्थानं तस्मिन्नपि पक्षे प्रातस्तनं याजमानं वात्सप्रेण सह सायंहोमे विकल्प्यत एव। किं च कारणम्। न स्यात्। संनियोगशिष्टस्यान्यतरापाये इतरस्याप्यपाय इति न्यायात्।

९. एतस्मिन्नपि पक्षे समानं समित्प्रभृतीति समानवचनाद्भवत्येव।

१४.

१. याजमानप्रसङ्गेन प्रवासप्रारम्भे याजमानमुच्यते। प्रवत्स्यन्नग्नीन्विहृत्याप्रसक्तान्[१] गार्हपत्यस्य पश्चात्प्राङ्मुखःस्थितः सर्वानीक्षते। अभयं वो ऽभयं नो अस्त्वित्यनेन मन्त्रेण। एतावानेव मन्त्रः। न

१ A ॰हृत्य। प्रत्याक्रिम्या॰ C (in marg) ऋक्रिमा B seems to read like C.

कामेन व उपतिष्ठ इत्याद्यनुषङ्गः[१]। तत्रोपस्थानमिद्धेष्वग्निष्विति विशेषात्।

२. नर्येत्येवमादिना मन्त्रेण गार्हपत्यमुपतिष्ठते। कुत एतत्। उपतिष्ठत इति श्रुतेः। अथ यत्प्रवत्स्यंश्च प्रोषिवांश्चाग्नीनुपतिष्ठत इति विशेषात्। शतपथे च। स गार्हपत्यमुपतिष्ठते नर्य प्रजां मे पाहीति।

३. अथर्येत्येवमादिना मन्त्रेणान्वाहार्यपचनमुपतिष्ठते। उत्तरेण स्थितः। तमिति यस्मादागत्याप्येवमेव। अर्थाद्दक्षिणेक्षमाणः[२]।

४. शंस्येत्येवमादिना मन्त्रेणाहवनीयमुपतिष्ठते। दक्षिणाग्निमुत्तरेण गत्वा। ननु चायमेव संचरः सर्वदा प्राप्तः। उच्यते। व्यवेतो ऽग्नीन्प्रवसतीत्यविशेषात्कदाचिदितरयोरप्युत्तरेण[३] यायात्। तन्निवृत्त्यर्थं वचनम्।

५. अयमेतावता मन्त्रेण त्रीणि पदान्यभ्युद्धृत्य। त्रिः पादविहरणं समन्त्रकं कृत्वेत्यर्थो वीप्सोपदेशात्।

६. प्रज्वलितानामुपस्थानम्। यावत्प्रज्वलितास्तावदागमनमित्येतदुभयमनेन सूत्रेणोक्तम्।

७. अग्निशब्देनाग्निहोत्रहोमो लक्ष्यते। उपस्थानशब्देन च याजमानम्। अतश्चैतदुक्तं भवति। अग्निहोत्रहोमीययाजमानस्थानर्देऽनुप्तं संभवदर्थं प्रवसन् जपेद्यजमानः। अत्र श्लोकः।

---

१ C om उपतिष्ठ ; A C om. चादि। २ Paddhati अथर्य पितुं म इत्यादिना अन्वाहार्यपचनम्। समन्वाहार्यपचनमुत्तरेण गत्वा शंस्य पश्चन्म इत्यादिना। ३ C (orig.) अन्तरेण।

याजमानं जपेत्सर्वं न त्वम्भ स्थ न संहिता[१]।
नेले न काम्यातो दैवः प्रोषितो यद्यनातुरः॥

८. याजमानग्रहणं क्रत्वर्थाक्रत्वर्थयोरनुष्ठानार्थम्। तत्र क्रत्वर्थं प्रातिनिधिकः कुर्यात्पुरुषार्थं यजमानः। चशब्दो ऽनर्थलुप्तमित्यस्या-नुकर्षणार्थः। अग्न्यन्वाधानपिण्डपितृयज्ञौ तु प्रातिनिधिकः कुर्यात्। ब्रह्मत्वेन यजमानस्य पाठव्यवधानात्। पर्वणीति वचनात्। येष्वेव संवत्सरसन्धिषु नित्यानि यजमानेन प्रत्यक्षेणोपक्रान्तानि तेष्वेव प्रोषितो याजमानं कुर्यात्। तद्यथा। पञ्चसन्ध्योर्दर्शपूर्णमासौ। क्रतुमुखेषु चातुर्मास्यानि। अयनाद्यन्तयोर्निरूढपशुबन्धः। तथा च मनुः।

अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा।
दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि॥ (४. २५)
सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजो ऽध्वरैः।
पशुना ह्ययनान्ते च समान्ते सौमिकैर्मखैः॥ (४. २६)

यस्य यावज्जीविकः प्रयोगः तस्य याजमानं प्रोषितो ऽपि कुर्यात्। तथैव प्रक्रमात्। कथं कुर्यात्। जपेन संपादयेत्। तदु-च्यते। वृष्टिरसि पाप्मानम्। अग्ने वायो अनुपदस्यम्। मयीदमि-न्द्रम्। आ प्यायतां ध्रुवा। सदसि सन्म इत्यादौ। सं ज्योतिषा-भूमेत्युत्सृज्यते। तथा भूर्भुवः स्वः सं मेति। तथैव अग्ने व्रतपते यो नो दूरे देष्टीति च। श्लोकौ चात्र।

वृष्टिरग्ने ऽनुपदस्यं मय्याप्यायनमेव च।

---

१ C (in marg): अम्भ स्थाम्भो वः। संहितासि। इह गहि। काम्या एत मयि वः। देवश्रुतरसि।

अथ्याः पश्च क्रमेण प्राक् पूर्णपात्राभिमर्शनात् ॥

अग्निसंबद्धमुत्सृज्य अथ्यमूर्ध्वमशेषतः।

अग्ने व्रतपते अथ्यं पाहि मां च विकल्पतः ॥

९. अनपेतमनपगतं कारणं हेतुर्यजमानस्य। तत्प्रयुक्तत्वात्कर्मणः। अतश्च प्रोषितो ऽपि ध्यानेन संपादयेत्। प्रक्रान्ते चेद्यजमान आगच्छेत्पूर्वं जपित्वा शेषं कुर्यादिति तैत्तिरीयाणाम्। नैमित्तिकमपि क्षामवत्यादि प्रातिनिधिकेन कारितं प्रोषितो यदि जानीयात्। ततस्तचापि याजमानं कुर्यात्।

१०. सन्धिवेलयोरग्निहोत्रवेलयोरित्यर्थः। द्विवचननिर्देशात्। वाशब्दो ऽन्युपस्थानस्यानर्थलुप्तं प्रवसन् अपेदित्यनेन सह विकल्पार्थः। एवमर्थमेवैतस्य सूत्रस्यारम्भः। पर्वणीति सिद्धे ऽपि सति। आचम्य वाग्यतो भूत्वा यावद्धोमकालः। पुनराचम्य ततो महाव्याहृतिभिर्विसर्गः।

११. अग्न्यागारस्य दर्शनगोचरे वाग्यमनं कुर्यात्। प्रोष्याय-नुपस्थायाप्रसर्गे तेन चैवोत्सृज्यत (२.१५.७) इति वाग्यमः।

१५.

१. अभयं वो ऽभयं नो ऽस्त्विति उत्तरतो वितानस्य स्थितः। तथैवेति प्राप्ते चकार उपस्थानस्य प्रकारान्तरमपि चास्तीति प्रज्ञापनार्थः। तथा च शतपथे। स वै खलु तूष्णीमेवोपतिष्ठेतेति।

२. उपतिष्ठते पश्चादाहवनीयस्य प्राङ्मुखः स्थितः। मृतनष्टेष्वपि पशुषु मन्त्रो भाविनीमाशिषमङ्गीकृत्य।

३. विद्यमानानां तृणानामपचयनं उपविश्य कर्तव्यम्। तत उत्थाय समिदाधानम्। एतत्सर्वेष्वग्निषु कार्यम्। अथोपविश्य तृणान्युपलुम्पतीति वाजिश्रुतेः।

४. उपतिष्ठत इति वाक्यशेषः।

५. उपतिष्ठत इति शेषः। अभिद्युम्नादिपाठो ऽग्ने पुरीष्याधर्याग्ने गृहपते मर्येति मा विश्वायौति।

६. व्यवायं कुर्वन्प्रवसति। आहवनीयमपरेणोदङ्मुखस्तेन चैवोत्सृज्यत इति समानम्। अनुपशान्तेषु च प्रतिनिवृत्तस्य[1] त एवाग्नयो ऽग्नीनिति वचनात्। प्रवासार्थत्वादुद्धरणस्य। प्रवासे ऽनिवृत्ते ऽनपवृत्तकर्माणो न लौकिकाः।

७. तेनैव मार्गेण तेनैव च न्यायेन प्रतिदिशमप्युपस्थाय प्रोषित उत्सृज्यते। वाग्यमादिनियमान्मुच्यते।

१६.

१. वास्तोष्पतीयं हविः कर्तव्यम्। ध्रौव्ये प्रवासे। कुतः। प्रवत्स्यन्नित्यधिकारात्। स एव ध्रुवः प्रवासो यत्र पुनर्गृहं नागन्तव्यम्। इतरस्त्वध्रुवः यत्र प्रोष्यायन्निति भवति। तेनैतदुक्तं भवति। यायावरप्रतिपत्तौ वास्तोष्पतियागो भवति। न केवलं गृहान्निष्क्रामतः किं तर्हि अन्येष्वपि संप्रयातेषु। संप्रवृत्तेषु प्रयाणकेष्वित्यर्थः। किमेकैकमप्यहरवस्थाय यानि[2] संप्रयातानि। नेत्युच्यते। दशरात्रादूर्ध्व-

---

१ A °त्तेष निवृ°। २ B °स्थाय यानि सं° C °स्था। यथाक°।

मवरे अर्धे दशरात्रः[1] सर्वस्तोक इत्यर्थः । तथा च तैत्तिरीयकम् । यत्र दशरात्रमुषित्वा व्रजेत्तत्र वास्तोष्पतिं यजेदिति ।

२. अग्नयो यत्र तिष्ठन्ति तदन्तो ऽग्निष्ठम् (आप. ६.२८.७) । तस्य दक्षिणे अनडुहि युक्ते । दक्षिणो युक्तो भवति सव्यस्य योक्त्रं पर्याहृतमिति चरकाणाम् । ननु एवं सति अनोयायिनामेवैतत्कर्म । नेत्युच्यते । प्रयाणप्रयुक्तत्वात्स्कन्धवाहिनामपि भवति । उपोह्य चीवरम् । आरोप्य वित्तमित्यर्थः । अग्निष्ठस्था[2] एवाग्नयः समाख्यानात् । वास्तोष्पते प्रति जानीह्यस्मानिति पुरोनुवाक्यामनूच्य वास्तोष्पते शग्मया संसदा त इति यजति । प्राप्तस्य पुनर्वचनं परिसङ्ख्यार्थम् । परिसङ्ख्या च प्रकृतिं निवर्तयतीति । प्राकृतस्य कंप्रपद्यादेर्निवृत्तिः । अत्याधानाग्न्यन्वाधानयोरनिवृत्तिः ।

३. कृते हविर्यन्नावर्जितं[3] त्यजेत् । यज्ञपात्रं[4] चीवरं चेति चशब्दः । तथा च शाखान्तरम् । यायावरप्रतिपत्तौ गृहपतिरित्यागममधिकृत्य ।

न हीनमन्वावर्तयेद्रुद्राय हि तद्धीयते ।
यद्धीनमन्वाहरेत्तद्रुद्रभृतमन्वाहरेयुरिति ॥

---

१ A अर्धे दशरात्रैः स० B अर्धो C अर्धेद० Paddhati : वास्तोष्पतीयं कर्म यायावरप्रतिपत्तौ भवति । न केवलं गृहाग्निष्क्रामतो यजमानस्य किं तर्हि दशरात्रादूर्ध्वं प्रवत्स्येषु मासुषेषु ततो ऽप्यदीयं कर्म । २ B अग्निषु स्था A om. एव । ३ B कल्कवर्जि ०C० यन्नाव० Paddhati : कृते च अनाहितं त्यजेत् । यज्ञपात्राणि गृह्यके नित्यहोमस्य तेषां चतुर्दश चतुर्गृहीतानि सकृदुद्भयते हविः स्रुवा समित्प्राशीमां अर्धमासाय कल्पते । एवं मार्दपत्ये च दक्षिणाग्नौ च जुहुयात् । ४ A अग्निपा० ।

१७.

१. समारोहयमाणो यजमानः। याजमानमेतत्। आत्मनेपदप्रयोगात्। गार्हपत्ये ऽग्नौ हस्तौ प्रतितप्य प्राणान् ब्रह्मलोकेन क्रमेण संमृशेत्। एहि मे प्राणानारोहेत्यनेन मन्त्रेण।

२. सकृत्संमर्शनं प्राणानां मन्त्रेण कृत्वा पुनः पाणी प्रतितप्य[१] तूष्णीं प्राणसंमर्शनम्। सकृदेवमेवापरम्। ततः पाणी प्रतितप्य पूर्ववन्मन्त्रेण प्राणसंमर्शनम्। पुनस्तूष्णीं पूर्ववद्भिः। न तु प्राणगता वीप्सा मन्त्रे बहुवचनात्।

३. अयं ते योनिर्ऋत्विय इत्यनेन मन्त्रेणारणी[२] प्रतितपति। पूर्वमधरारणिं तत उत्तरारणिम्। अरण्यनुप्रहरणे तथा दृष्टत्वात्। अस्मिन्पक्षे[३] ऽरण्योरेवारोपणमतो न प्राणान्संमृशेत्।

४. पूर्ववद्व्याख्या। तत्र संमर्शनमिह प्रतितपनम्। एतावान्विशेषः।

५. उद्धृत्याहवनीयं यथा गार्हपत्यात्प्राणेष्वरण्योर्वा। एवमाहवनीयादपि।

६. नित्यधृतादाहवनीयादन्यस्मिन्नरणिभाण्डे समारोपः। पृथगरणिष्वग्नीन्समारोहयत इति यावन्तो धार्यन्ते विज्ञायन्ते सहारणीभिस्तावतीभिर्हि संकर्षे।[४] संकर्षा हि नाम मीमांसा[५]द्वादशाध्या-

---

१ C (in marg) पुनः। २ A मन्त्रेण वारणी। ३ C पक्षस्मिन्। ४ A तावतीभिः सहन्तीभिर्हि संकर्षा नाम। ५ C om. हि नाम; sct. b. adds नाम।

धादूर्ध्वमस्ति। आहवनीयवचनाद्दक्षिणाग्निर्नित्यधृतो ऽपि समारोप्यते। तयोरेवारण्योः। अथ यदरण्योरग्नीन्समारोहयत इति (कौ० ब्रा. २.६) श्रुतेः।

७. अनस्तमिते आदित्ये यथाग्नि मन्थनं भवति। चशब्दादनुदिते च। एकयोनिसमारूढानां सकृन्मन्थनं कृत्वाहवनीयदक्षिणाग्न्योरुद्धरणम्। आरण्यके दर्शनात्। मथित्वाग्नीन्विहृत्येति। तथैव चानयनं नित्यधृतो नित्यधृतत्वात्।

८. उपावरोहेत्येवमादिना मन्त्रेणात्मनः सकाशादरण्योरुपावरोह्य। कथम्। नासिकया प्राणमरण्योर्मन्त्रान्तेन निक्षिप्य ततो मन्थनं कुर्यात्। दुरोण इति लिङ्गाद्गृह एव स्थितस्य यः समारोपस्तत्रैवैतद्भवतीति[1] नाशङ्का कर्तव्या। भार्या यत्राग्नयो ऽपि वेति गृह्यवचनात्तदपि गृहमेव। प्रवत्स्यन्निति चात्रानुवर्तते। तेन चाग्निकः प्रवत्स्यन्समारोहयमाणो ऽन्यत्रापि च[2] यत्र समारोपस्योद्यते तत्रैवं कुर्यात्। मन्थनाधिकारे मन्थनग्रहणं लौकिके मन्थनप्रतिषेधार्थम्। कथं विद्यमाने ऽग्नौ[3] मन्थनं प्राप्नोतीति चेत्। उच्यते। लौकिके चेति लौकिके काष्ठे न संस्कृतयोररण्योरुपावरोहणमित्येवं[4] कस्य चिदाशङ्का स्यात्।

९. पक्षान्तरमेतत्। लौकिके वाग्नावुपावरोह्य तत उद्धरणं कृत्वा ततो होमः। ततः परिसमाप्ते होमे लौकिक एव[5] प्राणेष्वर-

---

१ C om. त्र। २ B स। ३ A ins. लौकिके। ४ C om. उपावरोहणम् and has in marg उपावरोहणयोर् instead। ५ B ins. चाग्निः।